67.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

रसरत्नदीप

विज्ञानं अनयन्, तमः प्रशमयन्, शक्तिप्रभामुन्नयन्,
प्राचीनोपि गुणोदयेन नितरामौज्ज्वल्यमुद्योतयन् ।
वैद्यानां पथि सन्नयन् सुकरतां विद्यार्थिनः प्रीणयन्,
अध्यायं "रसरत्नदीप" उदयन् देयात्प्रमोदोदयम् ॥

ठाकुरदत्त वैद्यः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्रीरामराज विरचितः

रसरत्नप्रदीपः

—:o:—

श्री पण्डित ठाकुरदत्त शास्त्रि वैद्यरत्न विरचित

"रसरत्नप्रदीपालोक" विवरणोपेतः

—:o:—

Ras Ratna Pradip

EDITED BY

P. Thakur Datta Shastri Vaidyaratna.

प्रकाशकः

हिन्दी प्रभाकरः

श्री भानुदत्त साहित्यालंकारः

गुमटी बाज़ार, लाहौर।

प्रथमवार १०००] सं० १९८२ [मूल्यं १) रुपकम्

सर्वाधिकारः सुरक्षितः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्रीरामराज विरचितः

रसरत्नप्रदीपः

:o:

श्री पण्डित ठाकुरदत्त शास्त्रि वैद्यरत्न विरचित

"रसरत्नप्रदीपालोक" विवरणोपेतः

:o:

Ras Ratna Pradip

EDITED BY

P. Thakur Datta Shastri Vaidyaratna.

प्रकाशकः

हिन्दी प्रभाकरः

श्री भानुदत्त साहित्यालंकारः

गुमटी बाज़ार, लाहौर।

प्रथमवार १०००] सं० १९८२ [मूल्यं १) रुपकम्

सर्वोऽधिकारः सुरक्षितः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

प्राप्तिस्थानम्—

श्रीभानुदत्त साहित्यालङ्कार

अमृत औषधालय

गुमटीबाजार

लाहौर।



मुद्रणस्थानम्:—

'एजूकेशनल प्रिंटिङ्ग वर्क्स'

लाहौर।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥ ओ३म् ॥

द्वित्राः शब्दाः

नैतदविदितमस्ति रसशास्त्रविदां विदुषां यत् चिकित्सा-शास्त्रे रसस्य कीदृशं प्राधान्यमिति, सिद्धेनानेनैकेनैव रसेनेतर सकलरसात्मभूतेन सिद्धा भवन्ति भिषजां सर्वा अपि क्रियाः, न च मोमुह्यन्ते ते क्वचिदपि महारोगचिकित्सायामित्यपि सकलवैद्यक सम्मतमेव । शरीरस्थितिहेतुभूतस्य रसस्यापि प्राणभूतोऽयं रसः यत उक्तम्—

सर्वशास्त्रार्थतत्त्वज्ञो न जानाति रसं यदा ।
सर्वं तस्योपहासाय धर्म्मं हीनो यथा बुधः ॥

रसप्रधान्यम्

अल्पमात्रोपयोगित्वात् अरुचेरप्रसङ्गता,
क्षिप्रमारोग्यदायत्वात् औषधेभ्योऽधिकोरसः ।
साध्येषुभेषजं सर्वमीरितं तत्त्ववेदिना,
असाध्येष्वपिदातव्यो रसोऽतः श्रेष्ठउच्यते ॥

यत्सेवनेन देवदैत्यमुनिमानवादयोऽनेके दिव्यां तनुं लेभिरे तदेतदनेकग्रन्थपरिशीलनतोऽवबोद्धुं सुशकमिति न बहूपपादयामः । तस्यैवास्य रसस्यानेकयोगेषूपयुक्तस्यापि यथा प्रतियोगं प्रतिरोगं प्रतिप्रकारं लघुनैवोपायेन युक्तिविशेषोऽवगम्येत तथा नृपति रत्नदेव तनूद्भवः श्रीरामराज नामा 'रसरत्नप्रदीप' नामानं ग्रन्थं समाकलितवान् । यस्य मुद्रणमद्यावधि नाभूत् । किन्त्वनेक वैद्यकशास्त्र-सम्बन्धि प्राक्तनग्रन्थसमुद्धरणप्रकाशनपरिपाटीगृहीत दीक्षाव्रताः आचार्योपाह्व यादवजी त्रीकमजी इत्याख्याः सुहृदां धौरेया एतस्य ग्रन्थस्य मुद्राप्रकाशनकर्मणि मामबूबुधन्ननेकशः, तेषां महानुभवानां शुभामिमामामन्त्रणामामन्त्र्य मयाऽभाणि यत् श्रीमन्त एतस्य शुद्धामेकां लिपिं कारयित्वा मदन्तिकं प्रेषयन्त्विति । तैश्च तथैव

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ममाभ्यर्थनं स्वीकृत्य लेखादिभारं स्वशिरसि गृहीत्वा द्रागे-वैतत्पुस्तकं प्रेषितम् । अहञ्च अनेकरोगिपरीक्षणव्यस्ततया आलस्यमेव परमं शरणमप्राप्त इत्यहो सांसारिक कार्याणां सङ्कुलता दुर्निरीक्ष्या । आस्तांतावदेतत्—एषु दिवसेष्वपकाशं लब्ध्वा एतस्य संशोधनादिकर्मणि सावसरोऽभूवम् । कठिनकठिनस्थलेषु 'रसरत्न-प्रदीपालोकं' विवरणञ्चाकार्षम् ।

यथा च—आयुर्वेदाचार्य पण्डित स्वामि श्रीलक्ष्मीराम वैद्यरत्न वैद्यपञ्चानना: श्रीमाननीया महामहोपाध्याय द्वारकानाथ सेन कविरत्न कविराजा मम वैद्यकशास्त्रगुरवः रसक्रियाविषये सम्यगेव रहस्य-बोधन पूर्वकमध्यापितवन्तः, (येषां कृतज्ञतायाः परमभृणमवतारयितुं नालमस्मि) तेषां रीतिमनुरुन्धानएवाहमस्य ग्रन्थस्य विषमस्थ-लीयविवरणं रचयित्वाऽमुं 'रसरत्नप्रदीपं' प्राचीकशम् । उचित-मनु क्रमणादिकमपि च न्यधीविशम् ।

एतद्ग्रन्थस्य विवरण पाठभेदप्रवर्त्तनप्रभृतिकर्मसु सुसम्मति-प्रदानेन परं साहाय्यमानन्वाना: सकलशास्त्रकुशाग्रमतयोऽकुण्ठित लेखनीप्रभावाः कविताकिक नृसिंहदेवशास्त्रिणो दर्शनाचार्या अपि-मया अनेकैर्धन्यवादैर्भूष्यन्ते ।

किञ्च—ब्रह्मचारी प्राणनाथो नाममात्रान्तेवासी प्रदर्शितरीतिपुर:सरं सकलरस साधनकर्मणि नितान्तमालग्नोऽपि यन्त्रालये स्थित्वैव प्रूफसंशोधनकर्मणि महान्तं समयं यापयित्वा छात्राचारं सार्थकयन परमं साहाय्यमकरोदिति सर्वथा सुप्रसन्नहृदयेन अस्मै आशिषोवाचो वितीर्यन्ते । एवं कृतेऽप्यस्य संशोधने मनुष्यस्वभाव सुलभप्रमाद-वशात् यत्र कुत्रापि सम्भाव्यमाना अशुद्धिः शुद्धिप्रियैः सहृदयैः स्वयं संशोधनीया क्षन्तव्यश्चायं जन इति साञ्जलिबन्धमभ्यर्थ्यते—

तिथि चैत्र शुक्लैकादशी
गुरुवार स० १९८२.

विदुषामनुचरः
ठाकुरदत्त:

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

* ओ३म् *

आयुर्वेदाचार्य्य वैद्यरत्न

पण्डित श्री लक्ष्मीराम जी स्वामी

सद्वैद्यमौलिमुकुटायित-पूज्य-लक्ष्मी-
रामाङ्घ्रि-सेव्य सरसीरुह संनिधाने ।
अचाविधौ तमिममद्य सुरत्नदीपं,
विन्यस्तवान् सपदि ठाकुरदत्तवैद्यः ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कविराज पं० ठाकुरदत्त शास्त्री
वैद्यरत्न

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

National Art Press Anarkali LAHORE.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

रसरत्नप्रदीपान्तर्गत विषयानुक्रमणिका

विषय		पृष्ठ
प्रथमोऽधिकारः		
रसशोधनम्	...	४
दुष्ट सूतोपद्रवाः	...	४
शोधनप्रकारः	...	५
शोधने प्रकारान्तरम्	...	६
पुनः प्रकारान्तरम्	...	६
गन्धकशोधनम्	...	८
कज्जली करणम्	...	९
षड्गुणगन्धकजारणम्	...	९
अन्यः प्रकारः	...	१०
सूतभस्म प्रकारः	...	१०
रस मूर्च्छनम्	...	११
हिंगुलाद्रसाकृष्टि प्रकारः	...	१२
रसमार्तण्डः	...	१२
मुखकरणम्	...	१३
अजीर्णनाशनम्	...	१३
स्वर्णजारणम्	...	१३
लवणभेदी सुधानिधिः	...	१४
कर्पूररससूतः	...	१४
वीर्यस्तम्भनकरोहिरण्यगर्भ पोटलीरसः		१५
स्वर्णधातु शोधनम्	...	१५
उपरस शोधनम्	...	१६
स्वर्णमारणम्	...	१७
रूप्यरीतिकांस्यमारणम्	...	१८
नागमारणम्	...	१८
वङ्गमारणम्	...	१८
ताम्रमारणम्	...	१९
लोहमारणम्	...	१९
अभ्रकमारणम्	...	२०
वज्रमारणम्	...	२१
वैक्रान्तमारणम्	...	२१
अभ्रक सत्वपातनम्	...	२१
भूनागादि सत्वपातनम्	...	२२
द्वितीयोऽधिकारः		
नाराचरसः	...	२५
विरेकनिषेधः	...	२६
वमनम्	...	२६
वमननिषेधः	...	२६
सुक्षेत्री करणम्	...	२७
रसायनग्रहणविधिः	...	२७
क्षयीलक्षणम्	...	२७
हिरण्यगर्भपोटलीरसः	...	२८
अस्यानुपानविधिः	...	२८
लोकनाथरसः	...	२९
वर्ज्यसेव्ये	...	२९
मृगाङ्करसः	...	३१
राजमृगाङ्करसः	...	३१
कनकसुन्दरोरसः	...	३२
पाण्डुः	...	३३
त्रैलोक्यनाथरसः	...	३३
कालविध्वंसनोरसः	...	३४
मण्डूरः	...	३४
कासश्वासौ	...	३५
भागोत्तर वटकः	...	३५

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

विषय	पृष्ठ
पञ्चानन पर्प्पटीरसः ...	३६
श्वासकुठारोरसः ...	३६
वान्तिः ...	३७
तृष्णा ...	३७
हिक्का ...	३७
मूर्च्छा ...	३८
रक्तपित्तम् ...	३८
दाहः ...	३८
अरुचिः ...	३८
पानात्ययः ...	३९
वांतः ...	३९
अग्निकुमारः ...	३९
वाताधिकारे पर्प्पटीयोगः ...	४०
वडवानलरसः ...	४०
रोगेभसिंहः ...	४१
कम्पवातारिः श्रीकण्ठगुटिका ...	४२
तृतीयोऽधिकारः	
वातरक्तम् ...	४३
सर्वेश्वरोरसः ...	४३
शिलाजतु प्रयोगः ...	४३
अर्केश्वरोरसः ...	४४
शूलम् ...	४४
त्रिपुरभैरवोरसः ...	४४
शूलगजकेशरीरसः ...	४५
अग्निमुखोरसः ...	४५
शूलनिकृन्तनीगुटिका ...	४५
उन्मादः ...	४६
भूतभैरवरसः ...	४६
अपस्मारः ...	४६
गुल्मः ...	४७
वडवानलोरसः ...	४८
वज्रेश्वरोरसः ...	४८
उद्दामाख्योरसः ...	४८
विद्याधरोरसः ...	४९
मेहः ...	५०
मेघनादरसः ...	५०
हरिशंकरोरसः ...	५०
मेहभैरवः ...	५०
वज्रेश्वरोरसः ...	५१
भगन्दरः ...	५२
रविताण्डवरसः ...	५२
मूत्रकृच्छ्रम् ...	५३
अश्मरी ...	५३
त्रिविक्रमोरसः ...	५३
लिङ्गदोषः ...	५४
अर्शः ...	५४
चण्डकुठारोरसः ...	५४
अर्शकुठारोरसः ...	५५
तीक्ष्ण मुखरसः ...	५६
लेपौ ...	५६
ग्रहणी ...	५७
वज्रकपाटरसः ...	५७
कनकसुन्दरः ...	५७
अर्शोघ्नः पारदभस्मप्रकारः ...	५७
हंसपोटलीरसः ...	५८
कनकप्रभागुटिका ...	५८
विजयागुटी ...	५९
अतीसारः ...	५९

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

विषय		पृष्ठ
मृत संजीवनोरसः	...	५९
अतिसारकुठारोरसः	...	६०
अतिसारभैरवोरसः	...	६०
शोथः	...	६०
कृमिरोगः	...	६०
कृमिमुद्गरः	...	६०
कृमिघातिनीवटिका	...	६१
हृद्रोगः	...	६१
हृद्रोगकेसरीरसः	...	६१
चतुर्थोऽधिकारः		
ज्वरः	...	६२
उदकमञ्जरीरसः	...	६२
ज्वरधूमकेतुः	...	६३
ज्वरांकुशः	...	६३
गदमुरारिः	...	६३
विद्याधरोरसः	...	६३
त्रैलोक्यडम्बरोरसः	...	६४
भस्मेश्वरोरसः	...	६४
वैरोचनोरसः	...	६४
प्राणेश्वरोरसः	...	६५
ज्वरसूदनः	...	६७
कालाग्निरुद्रः	...	६८
पञ्चवक्त्ररसः	...	६८
सूचिकाभरणोरसः	...	६९
मृतसंजीवनोरसः	...	६९
अपरोमृतसंजीवनः	...	
(आरोग्यकारीरसः)	...	७०
सन्निपातभैरवनस्यम्	...	७१
प्रधमनम्	...	७१

विषय		पृष्ठ
मोहान्धसूर्य्यः । सूतार्णवः	...	७२
शीतारिः (विषमज्वरारिः)	...	७२
शीतभञ्जी	...	७२
अजीर्णम्	...	७३
क्रव्यादरसः	...	७३
ज्वालानलः	...	७४
आमवातचिकित्सा	...	७५
आमवातारिः	...	७५
विद्रधिः	...	७६
वृद्धिः	...	७६
पातालयन्त्रम्	...	७७
श्लीपदम्	...	७७
मूत्राघातः	...	७८
व्रणः	...	७८
मेदः	...	७९
वडवानलरसः	...	७९
विसर्पः	...	८०
कुष्ठम्	...	८०
वज्रेशरसः	...	८१
गलत्कुष्ठारि	...	८१
तालकेश्वरः	...	८२
श्वित्रप्रतीकारः	...	८२
श्वेतारिरसः	..	८३
पञ्चमोऽधिकारः		
गलगण्डः	...	८४
अम्लपित्तम्	...	८४
लीलाविलासोरसः	...	८५
अपरोलीलाविलासोरसः	...	८५
शीतपित्तचिकित्सा	...	८६

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

विषय		पृष्ठ
विस्फोट चिकित्सा	...	८६
नेत्ररोग चिकित्सा	...	८७
रसादिवर्तिः	...	८७
रसशलाका	...	८७
स्वर्णादिगुटिका	...	८८
मुखरोगचिकित्सा	...	८८
कर्णरोगचिकित्सा	...	८९
नास रोग चिकित्सा	...	८९
शिरोरोगाः	...	९०
प्रदरः	...	९०
योनिदोषचिकित्सा	...	९०
क्लैब्यवाजी करणे	...	९०
पञ्चशरोरसः	...	९१
मदनोरसः	...	९१
चन्द्रोदयरसः	...	९२
पूर्णेन्दुः	...	९४
बृंहणम्	...	९६
अमृतार्णवः	...	९६
पूर्णचन्द्रः	...	९७
सर्वाङ्गप्रीणनोरसः	...	९७
विषचिकित्सा	...	९९
विषवज्ररसः	...	९९
क्षीरसागरोरसः	...	१००
कफकेतुः	...	१०१
नाड़ीपरीक्षा	...	१०१

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अथ रसरत्नप्रदीपः

प्रेङ्खोलत्स्फुटनीरनीरजदलाद्वैतप्रतीतिप्रदा
दृष्टिर्दोष्णि तमालनीलिमगुणद्रोहिण्यनन्तस्य वः ।
लक्ष्म्याः सास्तु सुखाय बिम्बितवती या भाति नीलाम्बुद-
श्यामे श्रीयमुनाप्रवाहजठरे लोलेव मीनाङ्गना ॥ १ ॥

जयति विदितसारः सृष्टविश्वोपकारः
प्रबलगदकुठारः संहिताकण्ठहारः ।
सकलगुणसमाजः सिद्धविद्यानिकुञ्जः
पुरहरतनुजन्मा तेजसः स्फारपुञ्जः ॥ २ ॥

ग्रन्थप्रतिबन्धकीभूतसकलप्रत्यूहशमनं शिष्टाचारपरम्पराप्राप्तमाशीर्वादात्मकं मङ्गलमाचरति ग्रन्थकारः **प्रेङ्खोलदिति** । प्रेङ्खोलत्=समीरजुन्नं यत् स्फुटं निर्मलं नीरं पानीयम् तत्रत्यं नीरजं कमलं तस्य दलं पल्लवम् तयोः नीरनीरजदलयोर्या अद्वैतप्रतीतिः अभेदावभासः तत्प्रदा तदुद्भावयित्री इति 'दृष्टि' रित्यस्य विशेषणम् । लक्ष्म्याः श्रियो दृष्टिर्वः सुखायास्तु इति सम्बन्धः । कीदृशी सा—अनन्तस्य देशकालादिपरिच्छेदातीतस्य विष्णोर्भगवतः दोष्णि भुजायां बिम्बितवती सङ्क्रान्ता संलग्नेति यावत् । कीदृशे दोष्णि—तमालेति । तमालस्य यो नीलिमगुणः अर्थात् नीलतैव तस्य द्रोहिणि तत्स्पर्धयितरि । एतेनोपमानव्यतिरेको व्यक्तीकृतः । **दृष्टिमुपमिनोति**—या दृष्टिः नीलाम्बुदश्यामे नवजलधरसदृशे श्रीयमुनाप्रवाहजठरे लोला=चपला मीनाङ्गना शफरी इवाभाति शोभते इत्यर्थः ॥ १ ॥

पुरहरतनुजन्मा=महादेवदेहसमुत्थः । तेजसः स्फारपुञ्जो जयति सर्वोत्कर्षेण वर्त्तत अतस्तम्प्रत्यस्मि प्रणत इति लभ्यते ॥ २ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अस्ति प्रशस्तिरिव भूरिसुवर्णपूर्णा
काष्ठेति नाम नगरी यमुनातटान्ते ।
यस्यां नरेन्द्रतिलको हरिचन्द्रनामा
राकान्वयैकमुकुटः क्षितिपो बभूव ॥ ३ ॥
तस्यात्मजः क्षितिपतिर्जगति प्रसिद्धः
साधारणो रणविनिर्जितशत्रुसेनः ।
त्रिस्थानराज्यमधिगम्य जगद्विरिञ्चे-
र्भूतं स्थितं च पुरतोप्यकरोत्प्रतापात् ॥ ४ ॥
तस्यात्मजास्त्रय इमे विदिता जयन्ति
ज्यायानयं समिति लक्ष्मणसिंहनामा ।
शत्रून्विजित्य कृतवान् रिपुकामिनीनां
वर्षां विलोचनयुगे हृदये निदाघम् ॥ ५ ॥
श्रीमान्परः सहजपाल इति क्षितीन्द्रः
चन्द्रः स्वयं सुकविलोचनकैरवाणाम् ।
स्त्रीणां नृणां हृदयपङ्कजकर्णिकायां
तुल्यानुराग इव भाति गुणैः सदा यः ॥ ६ ॥
सत्कीर्तिकान्तिविमलो वचसां विलासो
हारावलीव लुठति श्रुतिपाठकानाम् ।

'भूरिसुवर्णपूर्णा' इति कथनेन कोऽपि यत्र निर्धनो नाभूदिति सूचितम् । 'काष्ठा' इति नगर्या नाम । राकान्वयैकमुकुटः 'राका' इति तदीयवंशनाम ॥ ३ ॥

रणे सङ्ग्रामे विनिर्जिता शत्रूणां सेना येनसः ॥ ४ ॥

रिपुकामिनीनां विलोचनयुगे वर्षां हृदये निदाघं दाहञ्च कृतवानिति ॥ ५ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कण्ठे कवित्वधनिनां मदनो नरेन्द्रो
लक्ष्मीनिवासनिलयो बलिवद्वदान्यः ॥ ७ ॥
वंशेऽथ विश्वविदिते नृपरत्नपालः
प्रादुर्बभूव करुणावरुणालयेऽस्मिन् ।
यस्मादभूत्सुतनयो विनयाम्बुराशिः
श्रीरामराज इति रम्यतया श्रिया च ॥ ८ ॥
साधारण क्षितिपतेः स नियोगयोगात्
संप्राप्य सेवकपदं खलु रामराजम् ।
नानामयान्धतमसः प्रशमाय धन्यो
रम्यं करोति कुतुकाद्रसरत्नदीपम् ॥ ९ ॥
दृष्ट्वेमं रससागरं शिवकृतं श्रीकाकचन्द्रेश्वरी-
तन्त्रं सूतमहोदधिं जलसुधाम्भोधिं भवानीमतम् ।
व्याडिं संसृतिसूत्रमीशहृदयं स्वच्छन्दशक्त्यागमं
श्रीदामोदरवासुदेवभगवद्गोविन्दनागार्जुनान् ॥ १०
आदाय सारं गुरुसम्प्रदायात्
सम्प्रत्ययं सानुभवं सुगम्यम् ।
यदुच्यते किञ्चिदिह प्रसिद्धं
ज्ञातव्यमार्यैस्तदिदं सुखाय ॥ ११ ॥
जयति विलासो वचसामादिग्रन्थार्थसंभवो यद्वत् ।
जलनिधिमुक्ताहारः कान्ताकण्ठे स्थितो लोलः ॥ १२ ॥

तस्य दानशूरतामाह—सत्कीर्त्तीत्यादिना ॥ ७ ॥

स्वग्रन्थस्य प्रामाणिकतावोधनाय सन्मूलतां स्वष्टीकुर्वन्नेवाह—'दृष्ट्वा' इति ।
'रससागर' प्रभृतयो वैद्यकमहानिबन्धाः ॥ १० ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अथ रसशोधनम्

जयेदयं (१) संहितस्याप्यजेयान्
रोगान्महापातकजान्क्षणेन ॥
शुद्धस्ततः शोधनश्चास्य कार्य्य-
मार्यैरशुद्धो न सुखाय सूतः ।
अन्तः सुनीलो बहिरुज्ज्वलो यो
मध्यान्हसूर्य्यप्रतिमप्रकाशः ॥ १४ ॥
शस्तोऽथ (२) धूम्रः परिपाण्डुरश्च,
चित्रो न योज्यो रसकर्मसिद्धौ ।
स्वाभाविकाः सन्त्यगुणा रसेऽस्मि-
न्नागाग्निवङ्गानिलनामधेयाः ॥ १४ ॥

(अथ दुष्टसूतोपद्रवाः)

नागाद्भवेयुर्गलगण्डरोगाः
कुष्ठं च वङ्गान्मरणं विषेण ।
मलेन मूर्च्छा दहनेन दाहो
वीर्य्यच्युतिः स्यादसकृच्चलत्वात् ॥ १५ ॥

---

(१) 'संहितस्य'—प्रतिकूलीभूतसकलदोषवतोऽपि रोगिण इत्यर्थः । 'अन्तः-सुनीलः'—आकाशवदित्यर्थः । वक्ष्यमाणनागादिदोषवर्जनार्थं शोधनमावश्यकमिति भावः ।

(२) 'धूम्रः'=धूसरः 'गंदला' इति भाषायाम् । 'परिपाण्डुरः'=बहिः किञ्चित् पीताभः 'चित्रः'=लेखाकीर्णः । नागेति—

उक्तञ्च 'रसेन्द्रसारसंग्रहे'—

नागो वङ्गो मलो वह्निश्चाञ्चल्यञ्च विषक्रिरिः ।
असह्याग्निमहादोषा निसर्गा पारदे स्थिताः ॥ इति ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

जाड्यं महत्कण्डुकफोदराणि
ततो विशुद्धोऽभिमतो रसेन्द्रः ।
(१) शुद्धेऽन्हि शंभुं परिचिन्त्य कुर्यात्
सम्यक्कुमारीवटुकार्चनं च ॥ १६ ॥
विधाय रक्षां निजमन्त्रपूजां[तां]
समारभेत्कर्म रसस्य तज्ज्ञः ।

(अथ शोधनप्रकारः)

(२) निशेष्टिकाधूम्ररजोम्लपिष्टो
विकञ्चुकः स्याद्दिवसेन सोर्णः ॥ १७ ॥

---

(१) मुमुहूर्ते वासरे ।

(२) 'निशा'=हरिद्रा । 'इष्टिका'=इष्टिकाचूर्णम् । 'धूमरजः'=पाकशालीयभित्त्यादिलग्नधूमधूसरितरजः । 'आम्लम्'=निम्बुजम्बीरमातुलुङ्गादिरसः । एतैः पिष्टः 'सूत' इत्यग्रिमेणान्वयः । 'विकुञ्चक' इति—

पर्पटी पाटली भेदी द्रावी मलकरी तथा ।
अन्धकारी तथा ध्वाङ्क्षी विज्ञेयाः सप्त कञ्चुकाः ।

इति तन्त्रान्तरप्रसिद्धसप्तविधकञ्चुकरहित इत्यर्थः ॥

सोर्णः—ऊर्णा मेषादिलोम तेन सहितः ।

अयमाशयः—पूर्वं सूतमादाय हरिद्रारसेन खल्वे दिनमेकं यावत् मर्दयेत् ततः इष्टिकाखण्डेन खल्वे मर्दनम्,एवं धूमरजसापि सजलेन, ततः तथैव निम्बूकाद्यम्लरसेन मर्दनम्, तत ऊर्णामयेन वस्त्रेण पवयेत्, एवं कृते सति सूतो 'विकञ्चुको' जायते तेन नागवङ्गाद्या दोषा न प्रादुर्भवन्ति । परमिदं शोधनकृत्यमेकेकेन दिवसेन समापयेदिति 'प्राञ्चः' ।

वयन्तु—'सम्प्रति पूर्वकालापेक्षया प्रायःशुद्धपारदस्य लाभहेतोः सर्वोऽयं प्रयोगः एकोऽस्मन्नेव दिवसे चतुर्भिः प्रहरैः समाप्यः. अर्थात् दिनैककृत्यमेकेकेनैव यामेन समापयेत्, एवं कृतेऽपि व्यवहारे न दोषो भविष्यति । अथवा हिंगुलात् पारदमुद्धृत्य एकोऽस्मन्नेव दिवसे दर्शित शोधनविधि विदध्यात् तथापि न दोष इति चिन्तयामः ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized By S3 Foundation USA

(अथ शोधने प्रकारान्तरम्)

(१) वरारनालानलकन्यकाद्भिः
सत्र्यूषणाद्भिर्मृदितस्तु सूतः ।
स्विन्नो वराद्यैरथ दोलिकायां
दिनं मलाद्यै रहितस्त्रिभिः स्यात् ॥१८॥

(अथ पुनः प्रकारान्तरम्)

(२) तत्त्र्यंशताम्रेण विमर्द्य सूतं
जम्बीरनीरेण ततः प्रगाढम् ।
संरुध्य भाण्डद्वयगर्भमध्ये
पिष्टिं ततः संपुटमत्रणं तत् ॥१९॥

---

(१) 'वरा'=त्रिफला। 'आरनालम्'=काञ्जिकम्। 'अनलः'=चित्रकः। 'कन्यका'=कुमारिका। 'त्र्यूषणम्'=त्रिकटुकम्। एतेषां सर्वेषामद्भिर्जलैः। परन्तु त्रिफलानल-त्र्यूषणजलं क्वथितं ग्राह्यम्, तदपि तेषां स्वरसाभावे सत्येव।

अस्यायमाशयः—प्रथमं वरादिरसैर्यथाक्रमं मर्दनम्। ततः गलप्रदेशस्योभयपार्श्वे रज्ज्वा बद्धायां दोलिकायां रसं स्थापयेत्। ततः पुनः साधितं वरादिजलमेकस्यां हण्डिकायां पातयित्वा क्वथयेत्। तत्रैव तां सूतदोलिकां दोलिकायन्त्रविधिना लम्बयेत्, एवं कृते सति सूतः स्विन्नः सन् शुद्धो भवति। परमिदं खेदकृत्यमेकदिनसाध्यं जानीयात्। स्विन्नञ्च तं दोलिकात उद्धृत्य काष्ठकाचाश्मचीनमृत्तिकान्यतमे पात्रे पातयित्वा वस्त्रेणाच्छाद्य सवातप्रदेशे रक्षयेत् नतु कदापि लोहादिधातुमये पात्रे स्पर्शयेत्॥

(२) पारदपरिमाणतः तृतीयांशेन ताम्रेण विमर्द्य जम्बीरनीरेण। प्रगाढमिति। तथा बलेन मर्दनं कुर्यात् यथा तस्य पिष्टिर्भवेत्। उत्तरं कृत्यमाह संरुध्येति। भाण्डद्वयस्य मृण्मयपात्रद्वयस्य गर्भमध्ये पिष्टिम्=पारदपिष्टिम् अन्तः संरुध्य विनिवेश्येत्यर्थः, ततः 'चुल्ल्यां स्थापयेदि'ति शेषः। अथ अस्य तले प्रदीपप्रमाणम्=प्रदीपज्वलाप्रमाणमित्यर्थः; अग्निं विदध्यादित्यन्वयः। अथ, अस्य=सम्पुटितस्य भाण्डद्वयस्य शिरसि=उपरिभागे

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

निवेश्य चुल्ल्यां शनकैः प्रदीप-
प्रमाणमस्याथतले निदध्यात् ।
अग्निं शिरस्याथ जलार्द्रमेकं
वस्त्रं क्षिपेदल्पमनुष्णमेवम् ॥ २० ॥
वारत्रयेणोरगवङ्गसंज्ञौ
न स्तः प्रदिष्टोह्ययमूर्ध्वपातः * ।
कदर्थनेनैव नपुंसकत्व-
मेवं भवेदस्य रसस्य पश्चात् ॥ २१ ॥

एकं जलार्द्रं शीतजलक्लिन्नं वस्त्रं क्षिपेत्=धारयेत् । अल्पम् अनुष्णमिति द्वयं वस्त्र-विशेषणम्, अर्थात् तत् वस्त्रं अधोलम्बमानं न भवेत् उष्णताञ्च न गच्छेत्, सति तस्य शोषे वस्त्रान्तरेण सजलेन तत् क्लिन्नयेदिति न विस्मरणीयम् । येयमुपरि वर्णिता प्रक्रिया सा प्राचीना। इतोऽपेक्षया सरलां सुखकारीं रीतिं निरूपयामः तथाहि :—

तापसह (फ़ाइरप्रूफ) काचकटोरिकाद्वयमादाय दर्शितां सूतपिष्टिं स्थापयित्वा पैरिसप्लास्टरसंज्ञया (Parisplaster) मृत्तिकया तस्याः सन्धिं रुन्ध्यात् तदधः सुरादीपं = Spirit lamp स्पिरिट लैम्पसंज्ञं ज्वालयेत् । यदा उपरि पात्रे रसः (पारदः) संलग्नः स्यात् तदा दीपं परिहरेत्, यदा स्वाङ्गशीतं स्यात् तदा सम्पुटमुद्घाटयेत् उपरिपात्रे लग्नं पारदं अधः पात्रेऽवस्थितं ताम्रं च पृथक् २ संरक्षयेत् । अनया रीत्या उद्धियमानः सूतः अधः स्थितं ताम्रञ्च स्पष्टमेव प्रतीयते इति विशेषः

* उक्तञ्चः—भागास्त्रयो रसस्यार्कं भागमेकं विमर्दयेत् ।
जम्बीरद्रवयोगेन यावदायाति पिण्डताम् ॥
तत्पिण्डं तलभाण्डस्थमूर्ध्वभाण्डे जलं क्षिपेत् ।
कृत्वालवालं केनापि ततः सूतं समुद्धरेत् ॥
ऊर्ध्वपातनमित्युक्तं भिषग्भिः सूतशोधने ॥
इति रसेन्द्रसारसंग्रहे ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

बलप्रकर्षाय च (१) दोलिकायां
स्वेद्योजले सैन्धवचूर्णगर्भे
* वन्याहिनेत्राम्बुजमार्कवाणां
सतिक्तकानां दिवसं द्रवैक्ये ॥ २२ ॥
स्विन्नः स्थिरत्वं लभतेऽग्नितोये
सकाञ्जिके दीप्तियुतो ऽतितीक्ष्णः ॥

(अथ गन्धक शोधनम्)

† सदुग्धभाण्डास्यपटस्थितोऽयं
शुद्धो भवेत्कूर्मपुटेन गन्धः ॥२३॥

---

* 'वन्या'=गोरोचना । अस्मद्भावनया तु वन्यफला अर्थात् रक्ता कार्पासी प्रहीतव्या । 'अहिः'=वज्रोत्पन्नः 'डंडा थोहर' इति भाषायाम् । अत्र तु अस्य क्षीरमेव भावनार्थं ग्राह्यम् । 'नेत्रम्'=नेत्रवाला इति ग्राह्यम् । 'अम्बुजः'=हिज्जलः जलवेतस इत्यर्थः । 'मार्कवः'=भृङ्गराजः ॥ 'तिक्तकः'=किरातः ॥

(१) 'दोलिकायाम्' इति । दोलायन्त्रे इत्यर्थः । उक्तञ्च—

द्रवद्रव्येण भाण्डस्य पूरयित्वार्धमात्रकम् ।
सूत्रेण लम्बयेत् काष्ठे बद्ध्वा भेषजपोट्टलीम् ॥
स्वेदयेच्चान्तरगतां दोलायन्त्रमिदं स्मृतम् ।
पिधाय पच्यते यत्र तद्यन्त्रं स्वेदनं स्मृतम् ॥ इति ॥

† 'दुग्धं' गोर्ग्राह्यम् । 'कूर्मपुटेन'=कच्छपयन्त्रेण । उक्तञ्च—

जलपूर्णपात्रमध्ये दत्त्वा खर्परन्तु विस्तीर्णम् ।
तदुपरि रसविद्भिः स्थाप्यः सूतो मृदः कुण्डयाम ॥
लघु लोहकोटाविकया कृतपटु मृत्सन्धिलेपमास्थाय ।
देया तदुपरि सिकता चैकाङ्गुलिपरिमाणाऽपि ॥
ततस्खर्परं पूर्यं चाङ्गारकधनोपलैर्नोपचितम् । इति ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अथ कज्जलीकरणम्

आभ्यां कृता कज्जलिकाऽनुपानैः
सर्वामयघ्नी रसगन्धकाभ्याम् ।
शुद्धया विशुद्धोऽथ सुजीर्णगन्धो
दीप्तिप्रदः काञ्चनभुग् गदघ्नः ॥ २४ ॥
वदन्ति चैनं त्रिविधं सुबद्धं
संमूर्च्छितं वाऽपि मृतं रसेन्द्रम् ।
मूर्छां प्रपन्नो हरते विकारान्
बद्धो रसः खेचरतां ददाति ॥
मृतो मृतिं नाशयति प्रकर्षात्
कुर्य्याद्रसेन्द्रोऽगणितान् प्रभावान् ॥ २५ ॥
मूर्च्छादिकर्मत्रितयं मुखं च
सूताद्बलेः षड्गुणजारणं च ।
अजीर्णनाशं च यथातथं तु
ब्रूमोऽस्य रूपं प्रतिभाऽनुरूपम् ॥ २६ ॥

अथ षड्गुणगन्धकजारणम्

सूतप्रपाणं सिकतारुययन्त्रे
दत्वा बलिं मृद्घटितालपभाण्डे ।
तैलावशेषेऽत्र रसं (१) नियुञ्ज्या-
न्मग्नार्धकायं प्रविलोक्य भूयः ॥ २७ ॥

---

* 'आभ्यां रसगन्धकाभ्यामिति सम्बन्धः, समभागाभ्यामिति शेषः ॥

(१) 'निदध्यात्' इति पाठान्तरम् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

आषड्गुणं गन्धकमल्पमल्पं
क्षिपेदसौ जीर्णबलिर्बली स्यात् ।
रसेषु सर्वेषु नियोजितोऽय-
मसंशयं हन्ति गदं जवेन ॥ २८ ॥

अथान्यः प्रकारः

विलोडिते स्वर्णजलैर्विशुष्के
वस्त्रेऽथ दत्वा नवनीतगर्भे ।
चूर्णं (१) शिलातालकगन्धकानां
(२)सपन्नगानां समभागिकानाम् ॥ २९ ॥
कर्षप्रमाणां च ततोऽस्य वर्त्तिं
प्रज्वालयेत्तद्गलितं घृतं स्यात् ।
अनेन कुर्य्याद्रसनायकस्य
सर्वत्र पिष्टिं बलिजारणाय ॥ ३० ॥

---

(३) सूतभस्मप्रकारः

भागो रसस्य त्रय एव भागा
गन्धस्य माषः (४) पवनाशनस्य ।
संमर्द्य गाढं सकलं सुभाण्डे
तां कज्जलीं काचघटे निदध्यात् ॥ ३१ ॥

---

(१) 'शिला' = मनःशिला ।

(२) 'सपन्नगानाम्' = सनागानाम् । नागोऽत्र सीसकम् ।

(३) 'रससिन्दूरे' त्यपरं नाम ।

(४) 'पवनाशनस्य' = सीसकस्य ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

संरुध्य (१)मृत्कर्पटकैर्घटीं तां
मुखे सचूर्णां वटिकां च दत्वा ।
क्रमाग्निना त्रीणि दिनानि पक्त्वा
तां (२) बालुकायन्त्रगतां ततः स्यात् ॥ ३२ ॥
(३)बन्धूकपुष्पारुणमीशजस्य
भस्म प्रयोज्यं सकलामयेषु ।
निजानुपानैर्मरणं जरां च
हन्त्यस्य(४) वल्लः क्रमसेवनेन ॥ ३३ ॥

अथ रसमूर्च्छनम्

(५) इष्टिकायां सुपक्वायां सुखातं चतुरङ्गुलम् ।
कृत्वा काचेन संछिन्नं तस्यान्तः पिष्टिकां क्षिपेत् ॥३४

---

(१) 'मृत्कर्पटकैः'=मृत्तिकायुक्तवस्त्रखण्डैर्लेपयित्वेत्यर्थः ।

(२) भाण्डे वितस्तिगम्भीरे मध्ये निहितकूपिके ।
कूपिकाकण्ठपर्यन्तं बालुकाभिश्च पूरिते ॥
भेषजं कूपिकासंस्थं वन्हिना यत्र पच्यते ।
बालुकायन्त्रमेतद्धि यन्त्रं तत्र बुधैः स्मृतम् ॥

(३)'बन्धूको बन्धुजीवनश्च रक्तो माध्यान्हिकोऽपि च, 'दुपहरिया' इति भाषायाम् ॥

(४) रक्तिकापरिमित इत्येव देयः ।

(५) 'इष्टिकायाम्' = इष्टिकायन्त्रे इत्यर्थः । 'इष्टिका' यन्त्रप्रकारो यथा—

मध्ये गर्त्तसमायुक्तामिष्टिकां कारयेद्भिषक् ।
गर्त्ते चैव समास्थाय तस्यां सूतादिकं न्यसेत् ।
दत्त्वोपरि शरावञ्च सन्धिं मृल्लवणैर्लिपेत् ।
तदूर्ध्वे सिकतां किञ्चिद् दत्त्वा देयं पुटं लघु ॥
इष्टिकायन्त्रमेतद्धि कारयेद्बन्धकादिकम् ॥ इति ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

निम्बूद्रवार्द्रो गन्धोऽस्य देयो मूर्ध्नि द्विकार्षिकः ।
मुखं संरुध्य शुष्केऽथ (१)दद्याल्लावपुटं ततः ॥ ३५ ॥
शीते तस्योपरि पुनः पुटं देयं ततोऽधिकम् ।
एवं द्विस्त्रिश्चतुः कुर्य्याद्यावज्जीर्यति गन्धकः ॥३६॥
जीर्णे पुनस्तथा देयो यावज्जीर्य्यति षड्गुणः ।
मूर्च्छितो विधिनाऽनेन भवत्येव रसेश्वरः ॥ ३७ ॥

अथ हिङ्गुलाद्रसाकृष्टिप्रकारः

जम्बीरनिम्बुनीरेण मर्दितो हिङ्गुलुर्दिनम् ।
ऊर्ध्वपातनयन्त्रेण ग्राह्योऽस्मान्निर्मलो रसः ॥३८॥
कञ्चुकैर्नागवङ्गाद्यैर्विमुक्तो रसकर्मणि ।
योज्यः साम्बुपटुस्विन्नः (२)पूर्वाभावे भिषग्वरैः ॥३९

अथ रसमार्तण्डः

(३)बलाब्दरविभूधात्री सस्यघ्नी गोलिकाम्बुभिः ।
मर्दितस्तुर्य्यभागेन गन्धकेन समन्वितः ॥ ४० ॥

---

(१) ऊर्ध्वषोडशिकासूत्रैस्तुषैर्वा गोवरैः पुटम् ।
यत्र तल्लावकाख्यं स्यात्सुमृदु द्रव्यसाधेन ॥

(२) पूर्वाभावे = पूर्वोक्तप्रकाराभावे सति अनया रीत्या हिङ्गुलाद्रसं निष्कृष्य भिषजो व्यवहारं साधयन्त्वित्यत्र तात्पर्यम् ॥

(३) 'बला' = क्षुपविशेषः 'खरैटी' इति प्रसिद्धः । 'अब्दः' = मुस्ता 'नागरमोथा' इति प्रसिद्धिः । 'रविः' = अर्कः । 'भूधात्री' = भूम्यामलकी 'सस्यघ्नी' = मूषाकर्णी । 'गोलिका' = घोरटा पूगी 'सुपारी' इति प्रसिद्धिः । 'फल्गुतीरम्' = फल्गुः उदुम्बर-विशेषः तद्दुग्धमित्यर्थः । 'आम्लम्' = काञ्जिकं जलवेतसफलं वा । 'दधित्थजे' = कपित्थफलजे चूर्णे इत्यन्वयः । 'ईशजः' पारदः ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वेष्टितः हिङ्गुना फल्गुक्षीराम्लेन दधित्यजे ।
चूर्णे गर्भे प्रदेयोऽयमन्तर्लवणमीशजः ॥ ४१ ॥
प्रध्मातः शनकैर्बद्धो रसो भवति नान्यथा ।
वक्त्रस्थो वयसः स्थैर्य्यं करोत्यखिलरोगजित् ॥ ४२ ॥
(१)रामठं हलिनीकन्दमुशलीरसचित्रकैः ।
मूषाक्षेपस्तु कर्तव्यः क्षणार्धे बद्धमूतकम् ॥ ४३ ॥

अथ मुखकरणम्

सास्यो रसः स्यात्पटुशिग्रुतुत्थैः ।
सराजिकैः सोषणकैस्त्रिरात्रम् ।
पिष्टस्ततः स्विन्नतनुः सुवर्ण-
मुखानयं खादति सर्वधातून् ॥ ४४ ॥

अथाजीर्णनाशनम्

अजीर्णनाशाय सभूर्जपत्रे
स्वेद्यस्त्रिरात्रं पटुकाञ्जिकेऽथ ।
मात्राधिकश्चेत्समतामुपैति
यावन्न तावद्रसनाधिकारी ॥ ४५ ॥

अथ सुवर्णजारणम्

सच्छिद्रसलिलापूर्णं भाण्डवक्त्रे शरावकम्
दत्त्वाच्छिद्रे पक्वमूषा देया नीराऽवियोगिनी ॥४६॥

---

(१)'रामठम्' = हिङ्गु । 'हलिनी' = विपलाङ्गलिका । 'कन्दः' = शूरणकन्दः 'राजिका फलिनीकन्द तुलसीरक्तचित्रकः' इति पाठान्तरम् ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तस्यां विडावृतः सूतो देयो लोहावृतो मुखे
शनैर्धमातो ग्रमत्येष काञ्चनं सूक्ष्मतां गतम् ॥४७॥

अथ लवणभेदी सुधानिधिः

पिष्टं पांशुपटु प्रगाढमपलं वज्रयम्बुनाऽनैकशः
सूतं धातुयुतं खटीकवलितं तं संपुटे रोधयेत् ।
अन्तःस्थं लवणस्य तस्य च तले प्रज्वाल्य वन्हिं(१)दृढा-
द्रसं ग्राह्यमथेन्दुकुन्दधवलं भस्मोपरिस्थं शनैः॥४८॥
तद्वल्लद्वितयं लवङ्गसहितं प्रातः प्रयुक्तं नृणा-
मूर्ध्वं रेचयति द्वियामपसकृत्पेयं जलं शीतलम् ।
एतद्धन्ति च वत्सरावधि विषं षाण्मासिकं मासिकं
शैलोत्थं गरलं मृगेन्द्रकुटिलोद्भूतं च तात्कालिकम्॥४९

अथ कर्पूररससूतः

खटीष्टगैरिकं वाल्मीमृत्तिका सैन्धवं समम् ।
भागद्वयमितं श्लक्ष्णं रसो भागैक एव सः ॥ ५० ॥
संमर्द्य चैकतः कृत्वा गाढं च रसमौषधम् ।
हण्डिकायां विनिक्षिप्य पार्श्वे पार्श्वे च खर्परम् ॥५१
अन्यां च हण्डिकां दत्वा कृत्वा सन्धिनिरोधनम् ।
याम षोडशपर्यन्तमग्निं कुर्य्यादहर्निशम् ॥ ५२ ॥
अत ऊर्ध्वं रसं तस्माल्लघुं शीतं समानयेत् ।
कर्पूरपुलकाकारमुज्वलं दृष्टिसौख्यदम् ॥ ५३ ॥

(१) 'दृढम्' इति पाठान्तरम् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ग्रन्थिलं शिथिलं सौम्यं भक्ष्यमाणं निरामयम् ।
पुष्ट्याऽरोग्यपदं तीक्ष्णं कमनीयं सुखावहम् ॥५४॥
महामेहशमनं मत्तेभबलकारकम् ।
उपदंशादिरोगांश्च नाशयेन्नात्र संशयः ॥ ५५ ॥

(१) अथ वीर्यस्तम्भनकरो हिरण्यगर्भपोटलीरसः

उत्कृत्य मूलं विषजं निदध्या-
द्गर्भेऽस्य सूतं कनकाम्बुपिष्टम् ।
संवेष्टयेत्कोलभवेन तत्तु
मांसेन पश्चाद्विपचेद् द्वियामम् ॥ ५६ ॥
धत्तूर-बीजोद्भव-तैलगर्भे
स बद्धतां याति मुखस्थितोऽयम् ।
संभोगकाले दृढतां करोति
वीर्य्यस्य दुग्धं भजतां नराणाम् ॥ ५७ ॥

अथ स्वर्णधातुशोधनम्

स्वर्णाद्या धातवः सर्वे द्रवीभूताः सुयोजिताः ।
शुध्यन्ति वक्ष्यमाणेषु द्रवद्रव्येष्वनुक्रमात् ॥ ५८ ॥
तैले तक्रे गवां मूत्रे काञ्जिके सप्तधा पृथक् ।
क्वाथे कुलत्थजे पश्चाद्भस्म कार्य्यं यथाविधि ॥५९॥
स्यात्तीक्ष्णलोहयोः शुद्धरजसोऽथ पुटैस्त्रिभिः ।
रम्भाजलेन घृष्टस्य शिग्रुमूलत्वगम्बुना ॥ ६० ॥

---

(१) अयं योगो वाजीकरणाधिकारे पठनीय इत्युक्तिर्भाति ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पुनस्तप्तं हिमीभूतं (१) वाह्लीकाम्बुनि तद्रजः ।
प्लावितं मार्कवद्रावैर्भावितं सप्तधा ततः ॥ ६१ ॥
(२)मत्स्याक्षी सलिलैस्तद्वद्वरानीरैर्मृतं भवेत् ।
तत्कुष्ठ क्षयमन्दाग्निपाण्डुकासादिकान् गदान् ॥६२॥
नाशयत्यनुपानैः स्वैर्जरां च पलितैः सह ।
शुद्धि मारणयोरैक्यादुक्तमेतन्न दूषणम् ॥ ६३ ॥
स्वर्ण तारारताम्राणि नागवङ्गौच तीक्ष्णकम् ।
धातवः सप्त विज्ञेयाः सुभिषक्भिरुदाहृताः ॥६४॥

अथोपरसशोधनम् ।

(३) शुद्धः स्याच्चालकः स्विन्नः कूष्माण्डसलिले ततः ।
चूर्णोदके पृथक् तैले भस्मीभूतो न दोषकृत् ॥६५॥
(४) मातुलुङ्गजलैः पिष्ट्वा (५) जयानीरैर्मनःशिलाम् ।
सप्ताहं स्वेदितः शुद्धो रसको नरवारिणा ॥६६॥
(६) ओतोर्विष्ठासमं तुत्थं सक्षौद्रं टङ्कणाङ्घ्रियुक् ।
त्रिधैवं पुटितं शुद्धं वान्तिभ्रान्तिविवर्जितम् ।.६७॥
भावितो विमलो घर्षे जरज्जम्बीरवारिणा ।
(७) मेषशृङ्ग्यम्बुनाघस्रं शुद्धः (८) कर्कोटिकाजलैः ॥६८॥

---

(१) 'वाह्लीकम्' = कुङ्कुमम् ॥

(२) 'मत्स्याक्षी' = मीनाक्षी ।

(३) 'तालकः'=हरिताल्लम् । (४) 'मातुलुङ्गम्'=बीजपूरं 'बिजौडा' इति प्रसिद्धम् ॥ (५) 'जया'=भङ्गा ॥

(६) 'ओतोः'=मार्जारस्य । (७) 'मेषशृङ्गी'=मेंढासिंगी इति क्षुपविशेषः । (८) कर्कोटिका'='ककोडा' इति प्रसिद्धः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तुर्यांशसैन्धवोपेतं माक्षिकं मर्दयेद् दृढम् ।
बीजपूराम्बुना दग्धं सम्यक्पात्रेऽथ लोहजे ।।६९।।
अम्लद्रव्यद्रवैः पिष्टो (१) दरदो माहिषेण च ।
दुग्धेन सप्तधा पिष्टः श्लक्ष्णीभूतो विशुध्यति ।।७०।।
गोदुग्धात्रिफलाशृङ्गद्रवैः पिष्टं शिलाजतु ।
दिनैकं लोहजे पात्रे शुद्धिमायात्यसंशयम् ।। ७१ ।।
त्रिदिनं काञ्जिके क्षिप्तः शुद्धः (२)स्याद्विषतिन्दुकः ।
(३) अक्षाग्निदग्धं गोमूत्रसिक्तं लोहमलं शुचि ।।७२।।
पादांशशालि संयुक्तमभ्रं बद्ध्वाऽथ कम्बले ।
त्रिरात्रं स्थापयेन्नीरे तत्क्लिन्नं मर्दयेत्करैः ।। ७३ ।।
कम्बलाद्गलितं श्लक्ष्णं वालुकारहितं च यत् ।
तद्धान्याभ्रमिति प्रोक्तं सद्भिर्देहस्य शुद्धये ।।७४।।
कङ्कुष्ठं गैरिकं शंखः कासीसं टङ्कणस्तथा ।
नीलाञ्जनं शुक्तिभेदाः प्रवालाः सवराटकाः ।।७५।।
जम्बीरवारिणा स्विन्नाः क्षालिताः कोष्णवारिणा ।
शुद्धिमायान्त्यमी योज्याभिषग्भिर्योगसिद्धये ।।७६।।

अथ स्वर्णमारणम्

रसस्य भस्मना वाऽथ रसेनालेप्य (३) रैदलम् ।
हिङ्गुहिङ्गुलसिन्दूराशिलाः साम्येन मेलयेत् ।।७७।।

---

(१) हिङ्गुलः ।

(२) 'विषतिन्दुकः' = कुचला इति प्रसिद्धः । (३) 'अक्षाग्निदग्धम्' = विभीतक-वृक्षाग्निदग्धम् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(३) 'रैदलम्' = स्वर्णपत्रम् पत्रीकृतं सुवर्णमित्यर्थः ।

संमर्द्य काञ्चनद्रावैर्दिनं कृत्वाऽथ गोलकम् ।
तं भाण्डस्य तले धृत्वा भस्मना पूरयेद् दृढम् ॥७८॥
अग्निं प्रज्वालयेद्गाढं द्विनिशं स्वाङ्गशीतलम् ।
उद्धृत्य सावशेषं चेत्पुनर्देयं (१) पुटद्वयम् ॥ ७९ ॥
अनेन विधिना स्वर्णं निरुत्थं जायते मृतम् ।
एतद्रसायनं बल्यं वृष्यं शीतं क्षयादिजित् ॥ ८० ॥

अथ रूप्यरीतिकांस्यमारणम्

विधाय पिष्टिं सूतेन रजतस्याथ मेलयेत् ।
ताक्ष्यं गन्धसमं पश्चान्मर्दयेन्निम्बुकद्रवैः(२) ॥८१॥
द्वित्रैः पुटैर्भवेद्भस्म योज्यमेतद्रसादिषु ।
(३) राजरीतिन्तथा (४)घोषं ताम्रवन्मारयेत्पृथक् ॥८२

अथ नागमारणम्

त्रिभिः कुम्भपुटै(५)र्नागो वासारसविमर्दितः ।
(६)सशिलो भस्मतामेति तद्रजः सर्वमेहनुत् ॥ ८३ ॥

अथ बङ्गमारणम् ।

बङ्गं सतालमर्कस्य पिष्ट्वा दुग्धेन संपुटेत् ।
शुष्काश्वत्थभवैर्वल्कैः सप्तधा भस्मतां व्रजेत् ॥८४॥

---

(१) 'पुटत्रयम्' इति पाठान्तरं सम्यक्त्वं प्रपद्ये ।

(२) 'निम्बुकाम्बुना' इति पाठान्तरम् । (३) 'राजरीतिम्' = पित्तलविशेषम् ।
(४) 'घोषम्' = कांस्यम् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(५) 'नागः' = सीसकम् । (६) मनःशिलासहितः ।

अथ ताम्रमारणम् ।

सूक्ष्मं ताम्रदलं विमर्द्य पटुना क्षारेण जम्बीरजै-
नीरैर्घस्रमिदं स्नुगर्कपयसा क्लिन्नं (१) धमेत्सप्तधा ।
निर्गुण्ड्यम्बुहिमं रसेन्द्रकलितं दुग्धाम्ल (२) गन्धेन तत्
तुल्येनाथमृतं भवेत्सुपुटितं पञ्चामृतेन त्रिधा ॥८५।
वान्तिभ्रान्तिविवर्जितं ज्वररुजः कुष्ठानि पाण्ड्वामयं
शूलं मेहगुदाङ्कुरानिलगदानुक्तानुपानैर्जयेत् ।
गुञ्जामात्रमिदं ततो द्विगुणितं संशुद्धकायेन चे-
द्भुक्तं स्थौल्यजराविपत्तिशमनं पथ्याशिनो वत्सरात्८६

अथ लोहमारणम्

सत्यो ऽनुभूतो योगीन्द्रैः क्रमोऽयं लोहमारणे ।
कथ्यते रामराजेन कौतूहलधिया ऽधुना ॥ ८७ ॥
शुद्धस्य रसराजस्य भागो भागद्वयं बलेः ।
द्वयोः समं (३) सारचूर्णं मर्दयेत्कन्यकाम्बुना ॥८८॥
यामद्वयं ततो गोलं स्थापयेत्ताम्रभाजने ।
आच्छाद्यैरण्डजैः पत्रैरुष्णो यामद्वयाद्भवेत् ॥ ८९ ॥
त्रिदिनं धान्यराशिस्थं तं ततो मर्दयेद् दृढम् ।
रजस्तद्वस्त्रगलितं नीरे तरति हंसवत् ॥ ९० ॥

---

(१) 'धमेत्' = सप्तवारं तापयेदित्यर्थः । (२) अस्मद्भावनया तु 'दुग्धाज्यगन्धेन' इति युक्तः पाठः ।

(३) 'सारचूर्णम्' = लोहचूर्णम् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तीक्ष्णं मुण्डं कान्तलोहं निरुत्थं जायते मृतम् ।
त्रिफलामधुसंयुक्तमेतत्सेव्यं रसायनम् ॥ ९१ ॥

कूष्माण्डं तिलतैलं च माषान्नं राजिका तथा ।
मद्यं चाम्लरसं चैव त्यजेल्लोहस्य सेवकः ॥ ९२ ॥

अथाभ्रकमारणम्

(१) दुग्धत्रयं (२) नरजलं बहुकन्यकाद्भिः ।
गङ्गाजलैः सवटशृङ्गमजस्य रक्तैः ।
एभिर्विभाव्य गगनं विमलं विशुद्धं ।
भस्मीभवेत्कतिपयैश्च पुटैर्यथावत् ॥ ९३ ॥

दुग्धत्रयं कुमार्यम्बु गङ्गाजलं नृमूत्रकम् ।
वटशुङ्गमजारक्तमेभिरभ्रं सुमर्दितम् ॥९४॥
शतधा पुटितं भस्म जायते पद्मरागवत् ।
निश्चन्द्रिकं भवेत्तत्तु शुद्धं देयं रसायनम् ॥ ९५ ॥

---

(१) अर्कसेहुण्डवटानां क्षीरैरित्यर्थः । 'वैद्यकशब्दसिन्धौ' तु 'दुग्धत्रयम्' इति पदं गोमहिषीच्छागीदुग्धेषु सङ्केतितम् । अस्य श्लोकस्याद्यपादद्वयपाठोऽसमीचीन इवाभाति । किन्तु—

'दुग्धत्रयं नरजलञ्च कुमारिकाम्बु-
गङ्गाजलञ्च वटशुङ्गमजस्य रक्तम्'

इत्येवं पठनीयम् ।

(२) 'नरजलम्' नृमूत्रमित्यर्थः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अथ (१) वज्रमारणम्

व्याघ्रीकन्दगतं वज्रं दोलायन्त्रे विपाचितम् ।
सप्ताहं कोद्रवक्वाथे कौलत्थे विमलं भवेत् ॥ ९६ ॥
त्रिः सप्तकृत्वस्तत्तप्तं खरमूत्रेण सेचयेत् ।
मत्कुणैस्तालकं पिष्ट्वा तद्दोले कुलिशं क्षिपेत् ॥९७
प्रध्मातं वाजिमूत्रेण सिक्तं पूर्वक्रमेण च ।
भस्मीभवति तद्भुक्तं वज्रवत्कुरुते तनुम् ॥ ९८ ॥

---

(२) अथ वैक्रान्तमारणम्

वैक्रान्तं वज्रवच्छुद्धं ध्मातं तद्धयमूत्रके ।
हिमं तद्भस्म संयोज्यं वज्रस्थाने विचक्षणैः ॥ ९९ ॥

अथाभ्रकसत्त्वपातनम्

यदञ्जननिभं क्षिप्तं वन्हौ न विकृतिं व्रजेत् ।
वज्रसंज्ञं हि तद्योग्यमभ्रं सर्वत्र नेतरत् ॥ १००
भावयेच्चूर्णितं वज्रं दिनैकं काञ्जिकेन तत् ।
रम्भासूरणजैर्नीरैर्मूलकोत्थैश्च मेलयेत् ॥ १०१ ॥

---

(१) 'वज्रम्' = हीरकम् ।

(२) 'वैक्रान्तम्' इति' स्वनामख्यातमणिविशेषे 'चूनी' विशेषे इत्यर्थः । तच्च श्वेत-नीलरक्तभेदेन त्रिधा ।

वज्राकारतयैव प्रसह्यहरणाय सर्वरोगाणाम् ।
यद्विक्रान्तिं धत्ते तद्वैक्रान्तं बुधैरिदं कथितम् ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तुर्यांशं टङ्कणं चेदं क्षुद्रमत्स्यैः समं पुनः ।
महिषीमलसंमिश्रान्विधायास्याथ गोलकान्॥१०२
खराग्निना धमेद्गाढं सत्त्वं मुञ्चति कांस्यवत् ।
सत्त्वसेवी वयस्तम्भं कृतशुद्धिर्लभेत्सुधीः ॥ १०३॥

अथ भूनागादिसत्त्वपातनम्

ताम्रभूभवभूनागान्निशापिष्टान्समेन तान् ।
गुडादिकेन संयोज्य गणेनाथ धमेद् दृढम् ॥१०४॥
मुञ्चन्ति ताम्रवत्सत्त्वं तद्भद्राजलपानतः ।
नश्यन्ति जङ्गमविषाण्यशेषाणि न संशयः ॥ १०५
सर्वेषामपि पूर्वाणां सत्त्वपातनमारणम् ।
कर्तव्यं समसूतेन गन्धकेनाग्निगर्त्तके ॥१०६॥
गुडः पुरः सर्जरसोऽल्पमीना- (१)
दूर्णाज्यपिण्याकयुता सुलाक्षा ।
सटङ्कणश्चेति गणोऽयमुक्तः
सद्भिः परः सत्त्वविमोक्षणाय ॥ १०७ ॥
ये धातवो येऽप्युपपूर्वकाश्च
रसाः समृत्स्ना दृषदोऽप्यसाध्याः ।

---

(१) अयं पाठो न शुद्धः। 'ऽल्पमीनो मेषाज्यपिण्याक' इति युज्येत। गुडः = प्रसिद्धः। पुरः = गुग्गुलुः। सर्जरसः 'राल' इति। 'अल्पमीनः' = मत्स्यपूगः। मेषाज्यम् = मेषघृतम्। यथावर्णितपाठेन ऊर्णा = मेषोर्णा। आज्यम्=घृतम् पिण्याकम् = खलः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मुञ्चन्ति सत्त्वं मिलिता गणेन
गुडादिकेनात्र न संशयो ऽस्ति ॥ १०८ ॥
यत्रोपसरसभागोऽस्ति रसे तत्सत्त्वयोजनम् ।
कर्तव्यं तत्फलाधिक्यमिच्छता निश्चितात्मना ॥१०९

इति श्रीरत्नदेवसुतश्रीरामराजविरचिते रसरत्नप्रदीपे
रसोपरसधातुसत्त्वपातनमणिमारणं नाम
प्रथमोऽधिकारः ।



CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अथ द्वितीयोऽधिकारः

करोति यः कौतुकतः कवीनां
करे च कर्णे च सुवर्णवृष्टिम् । (१)
निरूपयत्यत्र स रामराजो
रसाननेकामयनाशनाय ॥ १ ॥

राजयक्ष्मा पाण्डुरोगः श्वासः कासो वमिस्तृषा ।
हिक्का मूर्च्छा रक्तपित्तं दाहारुचिमदात्ययाः ॥२॥
समीरातङ्कवातासृक्शूलोन्मादादयो गदाः ।
अपस्मृतिगुल्ममेहपिटकाः सभगन्दराः ॥ ३ ॥
मूत्रकृच्छाश्मरीलिङ्गदोषाश्च सगुदामयाः ।
ग्रहण्यतीसाररुजः श्वयथुः कृमिहृद्रदाः ॥ ४ ॥
संनिपातो ज्वरोऽजीर्णमामवातोऽथ विद्रधिः ।
मुष्कवृद्धिः श्लीपदं च मूत्राघातस्तथाव्रणः ॥५॥
मेदो विसर्पकुष्ठानि गलगण्डं (२) समालकम् ।
अम्लपित्तं शीतपित्तं विस्फोटनयनामयाः ॥ ६ ॥
मुखकर्णोद्भवानासारोगाश्च शिरसो गदाः ।
प्रदरं योनिदोषाश्च वाजीकरणमुत्तमम् ॥ ७ ॥
एतेषां सर्वरोगाणां विषान्तानां क्रमेण च ।
कथ्यते रसमार्गेण चिकित्सितमनुत्तमम् ॥ ८ ॥

(१) वृष्टिमिति पाठान्तरम् । (२) गण्डमाला ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अशुद्धकायस्य न रोगशान्त्यै
भवेन्महद्भेषजमप्यजस्रम् ।
वान्तं विरिक्तं प्रविलोक्य सम्यक्
ततः प्रयुञ्ज्याद्रसमिष्टसिद्धयै ॥ ९ ॥
धान्यनागरजं क्वाथं दत्वा पूर्वं दिनत्रयम् ।
स्नेहपीतं नरं रात्रौ प्रातः सम्यग्विरेचयेत् ॥ १० ॥

अथ नाराचरसः

जयपालसमैः सूतव्योषटङ्कणगन्धकैः ।
नाराचः स्याद्रसो माषमात्रः सर्पिःसितायुतः ॥११॥
हन्ति (१) संग्रहमानाहमामशूलं नवज्वरम् ।
वेलाज्वरं विरेकेण शीतलाम्बुनिषेवणात् ॥ १२ ॥
सूतं गन्धं समं शुद्धं सप्तधा भावयेत्क्रमात् ।
स्नुह्यर्कदुग्धैः (२) श्रीखण्डद्वयश्यामाभयारसैः ॥ १३ ॥
समं जैपालजं चूर्णं देयमेकत्र मर्दयेत् ।
उष्णाम्बुना वल्लयुग्मं देयमन्तर्गतं गुडे ॥ १४ ॥
मलं पूर्वं जलं पश्चात्तस्मादामं शनैः शनैः ।
उदराच्च (३) विनान्त्राणि सर्वं निर्याति किल्विषम् ।१५

---

(१) 'सङ्ग्रहम्' = चिरकालमान्त्रेषुसञ्चितं मलम् ।

(२) 'श्रीखण्डद्वयम्' = चन्दनद्वयम् । 'श्यामा' = कृष्णमूला त्रिवृत् । 'अभया' = हरीतकी ।

(३) 'विना आन्त्राणि' = आन्त्रेषु शूलपरीवर्त्तादि विना सर्वो मलदोषो निवृत्तो भवतीत्यर्थः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

जाते विरेके संशुद्धे पथ्यं दध्योदनं हितम् ।
जयेज्ज्वरादिकान्सर्वान्रसः सारणसुन्दरः ॥ १६ ॥

अथ विरेकनिषेधः

बालवृद्धक्षयक्षीणदीनशोकभयार्दिताः ।
रुक्षः शोषी तृषायुक्तो गुर्विण्यथ नवज्वरी ॥१७॥
अधोगच्छति यस्यासृक् सूतिका शल्यपीडितः ।
सद्यः श्लेष्माकुलो वातरोगी शीतनिपीडितः ॥१८
नैते विरेकयोग्याः स्युरन्येषां च बलाबलम् ।
दृष्ट्वा मात्रां प्रयुञ्जीत मृदुक्रूरादि भेदतः ॥ १९
त्वक्पत्रमरिचक्षौद्रशर्करासहितं पिबेत् (१)
त्रिवृच्चूर्णं विरेकाय मृदूनां पित्तरोगिणाम् ॥२०

अथ वमनम्

निम्बक्वाथं भस्मसूतं (२) राठमज्जायुतं पिबेत् ।
पित्तान्तं वमनं तेन जायते क्लेशवर्जितम् ॥२१॥

अथ वमननिषेधः

गुल्मितैमिरिकस्थूलक्षतक्षीणप्रमेहिणः ।
स्थविरोदर पाण्ड्वर्शःकृमिशूलिकृशादयः ॥२२॥
ऊर्ध्वरक्ती दृढाक्षेपसव्रणार्दितपीडिताः ।
न वाम्या वामिता एते यान्त्यसाध्यत्वमुद्धतम् ॥२३

(१) 'भवेत्' इति पाठान्तरम् । (२) मदनफलमज्जा ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अतिवान्तौ प्रयोक्तव्यं भिषग्भिर्मृदुरेचनम् ।
(१) साम्लो नाभौ रसालत्वग्लेपो रेकेऽतिदुर्धरे ॥ २४
कृताभ्यां वान्तिरेकाभ्यामन्तराग्नेरपाटवम् ।
जायते तच्छमः कार्यो भस्मसूतप्रयोगतः ॥ २५ ॥

अथ सुक्षेत्रीकरणम्

सुक्षेत्रमन्तरेणात्र नस्युर्योगा गुणप्रदाः ।
अतः शुद्धशरीरस्य तत्कर्तव्यं विजानता ॥२६॥
शिलाजतु (२) शिलालोहविडङ्गैः साज्यमाक्षिकैः ।
सताप्यैर्भस्मसूतस्य वल्लं मासं प्रयोजयेत् ॥२७॥
व्योषधात्रीरसाज्यैर्वा सितया मधुसर्पिषा ।
रसायनैर्वा दोषघ्नैरन्यैः सुक्षेत्रसिद्धये ॥२८॥

अथ रसायनग्रहणविधिः

ततः कर्माविपाकोक्तं कर्म कुर्य्यात्सुनिश्चितम् ।
पापप्रशान्त्यै पापोत्थो यतः सर्वो रुजां गणः ॥२९॥

अथ क्षयीलक्षणम्

श्लेष्माधिक्याद्वयवायाद्यैः पीडितो यश्च शुष्यति ।
कासश्वासार्दितो रक्तं वमेच्छुक्लेक्षणो ज्वरी ॥३०॥

---

(१) 'सोष्णो नाभौ रसालत्वग्लेपो रेकं निरोधयेत्' इति पाठान्तरम् ।
(२) 'शिवा' इति पाठान्तरम् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अग्निमान्द्य तृषायुक्तो रिरिंसुर्मांसलोलुपः ।
विस्वरश्छर्दिमान्दीनो स ज्ञेयः क्षयपीडितः ॥३१॥

अथ हिरण्यगर्भलोकेशपोटलीरसः

पलं मृतस्य सूतस्य कर्षः सद्धेमभस्मनः ।
बलेः पलद्वयं माषष्टङ्कणस्याथ मर्दयेत् ॥ ३२ ॥
क्षीरिणी चित्रकरसैर्दिनार्धं तेन पूरयेत् ।
कपर्दकान्पञ्च (१) गुल्मान् दश दन्तान्मलोज्झितान् ३३
मृष्टङ्कणाभ्यां वक्त्राणि लिप्त्वा तेषां परेऽहनि ।
संरुध्य चूर्णसंलिप्ते भाण्डगर्भेऽथमृन्मये ॥ ३४ ॥
(३) दोःखाते दिवसस्यान्ते पुटेदारण्यगोमयैः
स्वाङ्गशीतं समुद्धृत्य चूर्णयेत्तान्कपर्दकान् ॥ ३५ ॥
हिरण्यगर्भलोकेशो रसोऽयं क्षयरोगजित् ।

अस्यानुपानविधिः

द्वात्रिंशन्मरिचैर्दद्याद् द्विवल्लं सर्पिषा सह ॥ ३६ ॥
त्रिदिनं तु चतुर्थेऽन्हि साज्यमूषणजं रजः ।
सेव्यं सायं दग्धकम्बुचूर्णं साज्यं (४) जयान्वितम् ३७

---

(१) 'गुल्मान्' = स्थूलस्थूलान् कपर्दकान् 'कौड' इति प्रसिद्धान् ।

(२) अयम्पाठोऽयुक्तार्थं आभाति—अत एवम्पठनीयम्—'कपर्दकान्पञ्च दश गुल्मानान्त्रमलोज्झितान्' इति ।

(३) भुजपरिमाणे गर्त्ते ।

(४) 'जया' विष्णुक्रान्ता शोषाधिकारत्वात् नतु भङ्गा । इयं कफवातघ्नी शोथघ्नी कासघ्नी कण्ठ्या चक्षुष्या च । यदायं योगः अतिसारसङ्ग्रहणयादिदोषिणे प्रदेयः तदा 'जया' भङ्गैव ग्राह्या । परमयं योगः सर्वरोगहरः तेन उन्मादापस्मारशिरोरोगप्रभृतिषु 'जया' ब्राह्मी ग्राह्या । बद्धकोष्ठावस्थायान्तु सर्वेषां कृते 'जया' उष्टेन हरीतकी एव व्यवहरणीया ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अथ लोकनाथरसः

पलं कपर्दचूर्णस्य पलं पारदगन्धयोः ।
(१) माषाष्टौ टङ्कणस्यैतत् जम्बीराद्भिर्विमर्दयेत् ॥३८
पुटेल्लोकेशवन्नाम्ना लोकनाथोऽयमुत्तमः ।
क्षतं कुष्ठं रक्तपित्तमन्यान्रोगाञ्जवाज्जयेत् ॥ ३९ ॥
पुष्टिवीर्य्यप्रसादौजःकान्तिलावण्यदः परः ।
कोऽस्ति लोकेश्वरादीशो नृणां शम्भुमुखोद्गतात् ॥४०
पथ्यं शाल्योदनं सर्पिर्दधिशाकमहिंगुकम् ।
नित्यं यामद्वयादूर्ध्वं कार्यं वारत्रयं दिने ॥ ४१ ॥
त्र्यहेऽरुचौ वा-वान्ते वा(२) लग्नः सूतो न चेत्पुनः ।
अष्टमेऽन्हि प्रयोक्तव्यः पूर्ववत्कार्य्यसिद्धये ॥ ४२ ॥
प्रथमे सप्तके देया मुद्गसूरणलावकाः ।
द्वितीये माषगोधूमभक्ष्यं पूर्वोदितं च यत् ॥ ४३ ॥
देयानि मद्यमांसानि तृतीये मर्दनादिकम् ॥

वर्ज्यसेव्ये

तैलबिल्वारनालाम्लकोपस्त्रीकांस्यजागरान् ।
त्यजेत्कार्य्यादिकं चैव बल्यं स्वाद्वनुशीलयेत् ॥४४॥

---

(१) 'माषोऽपि टङ्कणस्यैको०' इति पाठान्तरम् ।

(२) अयमपि पाठोऽलग्नार्थकः, तस्मात्—'लग्नः सोऽयं न चेत्पुनः' इति पठितव्यमाभाति । अयमाशयः—यदि दिनत्रयपर्यन्तं सेवनात् रोगिण आनुकूल्यं न जातम् अथवा अरुचिर्वमनं वा स्यात् तदा दिनत्रयमन्तरित्य लोकनाथोऽष्टमे अहनि देयः, परन्तु अष्टमात् दिवसादारभ्य त्रिसप्तकं (एकविंशतिर्दिवसानाम्) यावत् दर्शितमिन्नभिन्नपथ्यानुसारं सेवयेत् ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

उष्णोदकं वमौ सेव्यं पित्ते तु ससितं हिमम् ।
अत्यग्नौ वारवीजानि नीलेक्षुं कदलीफलम् ॥४५ (१)
खर्जूरमांसममृद्वीकासितादिसकलं भजेत् ।
वीर्य्यच्युतौ चोचतोयं देयं तालफलाम्बु च ॥ ४६॥
आनाहारुचिमूर्छार्तिधूमोद्गारविसूचिकाः ।
अजीर्ण ज्वरबन्धाश्च कासश्वासादयश्च ये ॥ ४७ ॥
एतेषु लघु शाल्यन्नं केवलं सघृतं हितम् ।
अभिवान्तौ पिबेच्छिन्नारसं क्षौद्रेण संयुतम् ॥४८॥
सक्षौद्रं यावकं रक्तपित्ते रुचिविपर्य्यये ।
भृष्टधान्यं सितायुक्तमथवा क्षौद्रसंयुतम् ॥ ४९ ॥
यवागूं धान्यसंमिश्रां खादेद्वा माहिषं दधि ।
घृताक्तं स्वेदयेदङ्गं (२) सरुगुष्णेन वारिणा ॥५०॥
सक्षौद्रं पावकं रक्तं स्वेद्यमुष्णेन वारिणा ।
छिन्नाम्बु (३) सेन्दु वा सेव्यं दाहेऽजीर्णे सुधाजलम्५१
सोषणं सार्द्रकं रम्भाफलं भृष्टं कफोल्वणे ।
अन्येऽप्युपद्रवा ज्ञेया (४) हाकृच्छ्राम्यौषधादिभिः ॥५२

---

(१) 'रसेन्द्रसारसंग्रहे' तु:—

कूष्माण्डं कर्कटी चैव कलिङ्गं कारवेल्लकम् ।
कुसुम्भिका च कर्कोटी कलम्बी काकमाचिका ॥
ककाराष्टकमेतद्धि वर्जयेद्रसभक्षकः ॥
इत्युक्तमपि न विस्मरणीयम् ।

(२) सरुक्=रोगी । (३) सेन्दु=सकर्पूरम् । तत्र छिन्नाम्बु सेन्दुसेव्यम्=उशीरमिति दाहे व्यवहर्त्तव्यम् । अजीर्णे (तु) सुधाजलम् (Lime water) इति सम्बन्धो ज्ञेयः ।

(४) 'अन्येप्युपद्रवा ज्ञेयास्ते शाम्या औषधादिभिः' इति पाठे युक्तः प्रतीयते ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

द्वाविंशके दिने कार्य्यं स्नानमामलकैस्तिलैः ।
तिक्तं सेव्यं बले जाते शनैरग्निबलादनु ॥५३॥

अथ मृगांकरसः

रसेन तुल्यं कनकं तयोस्तु
साम्येन युञ्ज्यान्नवमौक्तिकानि ।
रसप्रमाणो बलिरंङ्घ्रिभागः
क्षारस्य सर्वे तुषवारिणा तत् ॥ ५४ ॥

संमर्द्य घस्रं तु विधाय गोलं
दिनं पचेत्तं लवणेन पूर्णे ।
भाण्डे मृगाङ्कोऽयमतिप्रगल्भः
क्षयाग्निमान्द्यग्रहणी-गदेषु ॥ ५५ ॥

साज्योषणैर्वा मधु-पिप्पलीभिः
वल्लोस्ति देयो न ततोऽधिकस्तु ।
लोकेशवत्पथ्यमिहप्रयोज्यं
त्याज्यं सदा पित्तकरं विदाहि ॥ ५६ ॥

अथ राजमृगांकरसः

भागास्त्रयोरसरजःकनकार्कभागौ
भागाश्च षड् बलिशिलाजतुतालकानाम् ।
एतान्विचूर्ण्य भरितान्सुकपर्दकांश्च
रुन्ध्यान्मुखेऽथ पयसा विडटङ्कणेन ॥ ५७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

दद्यात्ततो गजपुटं च मृगाङ्कसूतः
प्रोक्तोऽनुपानविधिना क्षयरोगहंता ।
नात्र त्रिरात्रनियमोऽस्ति च पोटलीवत्
पथ्यं तदेव खलु राजमृगाङ्कसूते ॥ ५८ ॥

अथ कनकसुन्दरोरसः

रसः कनकभागिकः कनकमाक्षिकस्ताल्कः
शिलारसकगन्धका रससमाः सतुत्था इमे ।
विमर्द्य पयसा रवेः सकलमेतदस्योपरि
द्रवैः प्रतिदिनं पृथक्तदिति भावयेद्बुद्धिमान् ॥५९॥
जयामुनिकलिप्रिया दहनभृङ्गवासोद्भवै-
रसै रससमैस्ततः सुदृढगोलकं स्वेदयेत् ।
मृगाङ्कवदथार्द्रकद्रवभरेण तत्सप्तधा
विमर्द्य कटुकत्रयाम्बुभिरयं क्षयस्यान्तकृत् ॥६०॥
रसः कनकसुन्दरो भवति सन्निपातेष्वयं
सदार्द्रकरसैस्तथा पवनगुल्मशूलादिहृत् ।
सविश्वघृतयोजितः सकलमत्र पथ्यं भवे-
द्यदुक्तमथ पोटलीविधिवेदवनान्यत्पुनः ॥ ६१ ॥
मद्यानि जाङ्गलं पक्षि मृगमांसं विशुष्यताम् ।
मुद्गषष्टिकगोधूमयवशाल्यादयो हिताः ॥ ६२ ॥
कुलित्थदाडिमकणापथ्यामलकनागरैः ।
साजमांसैः कृतो यूषः कफपीनसजाञ्जयेत् ॥ ६३ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अथ पाण्डुः

पाण्डुरः श्वासकासार्तः पीतत्वङ्नखलोचनः।
वाम्याग्निसादश्चयथुसहितः पाण्डुरोगवान्॥६४॥

अथ त्रैलोक्यनाथरसः

पलानि चत्वारि रसस्य पञ्च
गन्धस्य सत्त्वस्य गुडूचिकायाः।
व्योषस्य चूर्णस्य च तालमूल्या
सशाल्मलस्येह पलत्रयं स्यात्॥
पृथक् पृथक् षट् गगनस्य चाष्टौ
लोहस्य सर्वं त्रिफलाजलेन॥ ६५॥
घृष्टं चतुःषष्टिमितं तदर्धाः
स्युर्भावना मार्कवजद्रवस्य।
शिग्रूत्थनीरेण च षोडशाऽष्टौ
तथाऽनलोत्था गृहकन्यकायाः॥ ६६॥
आर्द्रद्रवस्येति रसोऽयमुक्तः
पाण्डुक्षयश्वासकफादिहन्ता।
क्षौद्रेण वा शर्करया घृतेन
कर्षार्धमेतस्य भजेत्प्रयत्नात्॥६७॥
रसेन सार्धं यवविश्वकायाः
शोथाधिके वा जयपालमिश्रः।
तज्जीघृतेनापि समस्तमद्या-
न्मृगाङ्कसूतप्रतिपादितं यत्॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

त्रैलोक्यनाथः प्रकटीकृतोऽयं
नरेन्द्रयोगीन्द्रमतादनर्घः ॥ ६८ ॥

अथ कालविध्वंसनो रसः

सुवर्णरूप्यताम्राणां पिष्टिं कृत्वाऽथ तावता ।
योज्या सूतेन तद्गोलं दोलायन्त्रे विपाचयेत् ॥६९॥
त्र्यहं (१) स्वर्णजले स्वर्णफलस्थं तं ततः क्षिपेत् ।
इष्टिकायन्त्रजठरे वस्त्रबद्धं समन्ततः ॥ ७० ॥
जम्बीरनीरसंपिष्टं बलेर्निष्कं प्रयोजयेत् ।
एवं शतगुणो यावद्रसाज्जीर्यति गन्धकः ॥ ७१ ॥
तावद्देयस्ततः पिष्टः समलोहोऽस्य भावनाः ।
तिस्रः (२) क्षुद्रात्रयस्याऽथ पृथक् लावपुटे स्थितः॥७२
एवं त्रिपुटितः पश्चात्करञ्जाग्न्यर्कजैर्द्रवैः ।
संपिष्टः पुटित (३) स्त्रिस्त्रिः कालविध्वंसनोरसः ॥७३
पाण्डुक्षयश्वासकासवन्हिसादादि यद्भवेत् ।
मतान्तरे निष्कमात्रंविषमास्मिन् प्रयोजयेत् ॥ ७४ ॥
गुञ्जामात्राऽस्य ताम्बूलीदलेन सह भक्षयेत् ।
गोमूत्रपिष्टामभयां त्रिवेत्तदनुपानकम् ॥ ७५ ॥

मण्डूरः

स्विन्नमष्टगुणे मूत्रे लोहकिट्टं सुसाधितम् ।
पाकान्ते त्र्यूषणं वन्हिवरादार्वीसुरद्रुमान् ॥ ७६ ॥

---

(१) धत्तूरजले । (२) 'सिद्ध' इति पाठान्तरम् । (३) 'क्षुद्रा'=कपटकारी ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(१)वेल्लरुक्चाथचव्यानि मुस्तं किट्टसमं क्षिपेत्।
प्रातः कर्षं भजेदस्य जीर्णे तक्रौदनं लघु ॥७७॥
हलीमकं पाण्डुरोगमर्शांसि श्वयथुं तथा।
ऊरुस्तम्भं जयत्येतत् कामलां कुम्भकामलाम् ॥७८॥
शालिषष्टिकगोधूमयवमुद्गादयो हिताः।
रसाश्च जाङ्गलभवा मसूराः पाण्डुरोगिणाम् ॥ ७९ ॥

अथ कासश्वासौ

संभिन्नकांस्यवद्घोषो निरेति वदनादयम्।
कास इत्युदितः श्वासस्तत्प्राबल्यात्प्रजायते ॥८०॥
उभयोः संभवे हेतुः श्लेष्मा तस्मात्प्रयोजयेत्।
कर्म श्लेष्महरं यस्मात् क्षये मुख्यावियौ सदा ॥८१॥

भागोत्तरवटकः

रसगन्धटंकणापथ्याकालिद्रुफलवासकाः।
भार्ङ्गीचेति क्रमाद् वृद्धमिदं बब्बूलजद्रवैः ॥ ८२ ॥
पिष्टं विंशतिरेकां च यावत्क्षौद्रेण गोलकान्।
कुर्य्यात्कर्षमितानस्य तमेकं प्रातरुत्थितः ॥ ८३ ॥
अद्यान्मासत्रयं क्षुद्राकाथं दशकणायुतम्।
पिबेत्तदनुकासाच्च श्वासाच्च परिमुच्यते ॥ ८४ ॥

---

(१) 'वेल्लम्' =वायविडङ्गम्। रुक्'=कुष्ठम् 'कुढ' इति भाषा। 'वेल्लं रुक् चापि चव्यञ्च' इति पाठस्तु युज्यते।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अथपञ्चाननपर्पटीरसः

भागो रसस्य गन्धस्य द्वावेको लोहभस्मनः ।
एतद् घृष्टं द्रवीभूतं मृद्वग्नौ कदलीदले ॥ ८५ ॥
पातयेद्गोमयगते तथैवोपरि योजयेत् ।
ततः पिष्ट्वा द्रवैरेभिर्मर्दयेत्सप्तधा पृथक् ॥८६॥
भार्ङ्गीमुण्डीमुनिवराजयानिर्गुण्डिकाद्रवैः ।
व्योषवासककन्यार्द्रद्रवैः शुष्कं पुटेल्लघु ॥ ८७ ॥
आगन्धं खर्परे नाम्ना पर्पटीतिरसो भवेत् ।
सर्वरोगहरः स्वैः स्वैरनुपानैर्द्विमाषकः ॥ ८८ ॥
ताम्बूलीपत्रसहितः कासश्वासहरः परः ।
सकणः (१) सुरसाक्वाथानुपानं वा सगोजलम् ॥ ८९
अम्लिका तैलवार्ताक कूष्माण्ड (२) त्रपुसीफलम् ।
वर्ज्यं मासत्रयं सर्वं कफकृत्स्त्रीसुखादिकम् ॥ ९० ॥

अथ श्वासकुठारोरसः

सूतं गन्धं विषं शुद्धं टंकणं च मनःशिला ।
एतानि कर्षमात्राणि मरिचं चाष्टकर्षकम् ॥९१॥
एकैकं मरिचं दत्वा खल्वे चूर्णं निधाय च ।
कर्षषट्कं त्रिकटुकं दत्वा पश्चाद्विचूर्णयेत् ॥९२॥
सर्वमेकत्र संपूर्ण्य काचकुप्यां विनिक्षिपेत् ।
श्वासे कासे च मन्दाग्नौ वातश्लेष्मामयेषु च ॥९३॥

---

(१) 'सुरसा'=रक्ततुलसी, श्यामेत कृष्णा तुलसी ।
(२) 'त्रपुसीफलम्'=सुधावासः 'खीरा' इति प्रसिद्धिः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

गुञ्जामात्रं संददीत (१) पर्णखण्डेन बुद्धिमान्।
सन्निपाते च मूर्च्छायामपस्मारे तथा पुनः ॥ ९४
अतिमोहत्वमायाते नस्यं दद्याद्विचक्षणः।
रसः श्वासकुठारोऽयं सर्वश्वासविकारजित् ॥ ९५

अथ वान्तिः(२)

अजाजीधान्यपथ्याभिः सक्षौद्राभिः कटुत्रिकैः।
एतैः सार्धं भस्मसूतः सेव्यो वान्तिप्रशान्तये ॥९६॥

अथ तृष्णा(३)

सक्षौद्रमाम्रजम्बूत्थं पिबेत्क्वाथं रसान्वितम्।
सतृष्णो मधुना कुर्याद्गण्डूषान् (४) शीतले स्थितः ९७

अथ हिक्का

दशमूलीजलयुतं सूतं हिक्किषु योजयेत्।
श्वासकासहरः सर्वो विधिरत्रापि युज्यते ॥९८

---

(१) 'पर्णखण्डेन'=ताम्बूलदलेन।

(२) सिद्ध भैषज्यमणिमालायान्त्वेवमुक्तम्--

पिष्ट्वा स्रोतोऽञ्जनं जम्भजलैर्याम चतुष्टयम्।
मरिचाभावटी कार्य्या छर्द्यतिसार हारिणी ॥

स्रोतोञ्जनम् = सौवीराञ्जनम्। जम्भजलैः = जम्बीर जलैः वालातिसृतौ कृष्णच्छागी पयसोदेयेति ज्ञेयम्। पथ्यमत्र दधि सहितं भक्तं ज्वरे च दुग्धेन दातव्या पथ्यं त्वत्र मुद्गसूपः। अयं योगोऽतिसारे प्रायः प्रचलतीति ममानुभवः गुरूक्तिश्च।

(३) अस्माकमनुभवस्तु—

रसगन्धककर्पूरैर्मरिचोशीरचन्दनैः।
ससितैः क्रमवृद्धैश्च तृष्णा नश्यति तत्क्षणात्।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(४) शीतले स्थाने स्थित इत्यर्थः।

अथ मूर्च्छा

कणामधुयुतं सूतं मूर्छायामनुशीलयेत् ।
शीतसेकावगाहादि (१)बाह्वोर्वा पीडनं हठात् ॥ ९९

अथ रक्तपित्तम्

रक्तपित्ती भजेद्वासासहितं पर्पटीरसम् ।
वासाद्राक्षाभयानां वा क्वाथं शर्करया सह ॥१००

अथ दाहः

पूर्णेन्दुर्वक्ष्यमाणो यः स योज्यो दाहशान्तये ।
पीनोन्नतकुचाश्लेषः शीतलोऽन्नविधिर्हितः ॥१०१

अथारुचिः

ससूतमरुचिघ्नं स्यात्ति (२) त्तिडीकं गुडोषणम् ।
(३) कारव्यजाजीरुचकं मृद्वीका रौद्रदाडिमम् ॥१०२

---

(१) श्वासनिश्वासावरोधजा या मूर्च्छा तस्यां वेगेन द्वयोर्बाह्वोश्चालनं कुर्याद्भिषग्वरः । सिलवैस्टरोप्येवमेवह । Sylvestor's method of artificial respiration :—Place the patient on his back on the floor, with a block or pillow under his shoulders in order that the head may become partially extended ; then kneel at the patients head and grasp the arms above the elbows ; press them first well into the sides inorder to expel air, then drag them outwards and upwards over the head until they are in a line with the trunk, and keep them in this position so long as air enters the chest, some arrangement is needed to prevent the body from being dragged towards the operator.

(२) 'तित्तिडीकम्'=वृक्षाम्लम् । (३) 'कारवी'=कृष्णजीरकम् । 'अजाजी' श्वेतजीरकम् । 'रुचकम्'=सौवर्चलं कृष्णलवणमित्यर्थः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अथ पानात्ययः

(१) पूरकं हिङ्गुरुचकं सचव्यं विश्वदीपकम् (२)।
चूर्णं समूतं मद्येन पीतं पानात्ययं जयेत् ॥१०३

अथ वातः

लङ्घनातिव्यवायाच्च रूक्षशीतालभोजनैः।
करोति कुपितो वायुः क्रमाद्धातुगतो गदान् ॥१०४॥
पक्षाभिघातकम्पार्तिं (३) षाण्ड्यदण्डापतानकान्।
धनुर्वन्नमयत्यङ्गं कार्श्यपारुष्यजागरान् ॥१०५
ऊरुस्तम्भार्दिताक्षेपबाहुवर्तिमपितामयान्।
ग्रन्थबाहुल्यभीत्यात्र भेदास्त्वन्ये न दर्शिताः ॥१०६

अथ अग्निकुमारः

सूतगन्धकनागानां चूर्णं स्यादार्द्रवारिणा।
दिनं घर्मे विमर्द्याथ गोलकानस्य योजयेत् ॥१०७
काचकूप्यां च संवेष्ट्य तां त्रिमृत्कर्पटैर्दृढम्।
मुखं संरुध्य संशुष्कं स्थापयेत् सिकतामये ॥१०८
सार्धं दिनं क्रमेणाग्निं ज्वालयेत्तदधस्ततः।
स्वाङ्गशीतलमुद्धृत्य षडंशेनामृतं क्षिपेत् ॥१०९
मरिचान्यर्धभागेन समस्तस्याथ मर्दयेत्।
अयमग्निकुमारः स्याद्रसोमात्राऽस्य रक्तिका ॥११०

(१) 'पूरकम्'=बीजपूरकं बिजौरा इति। (२) 'दीपकम्'=अजमोदा।
(३) 'स्वाञ्ज्य' इति पाठान्तरम्।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ताम्बूलीदलसंयुक्तो हन्ति रोगानमूनयम् ।
वातरोगान्क्षयं श्वासं कासं पाण्डुं कफोल्वणम् ॥१११
अग्निमान्द्यं संनिपातं पथ्यं शाल्यादिकं लघु ।
जलयोगप्रयोगोऽपि शस्तस्तापप्रशान्तये ॥११२

अथ वाताधिकारे पर्पटीयोगः

पूर्वोक्तः पर्पटीसूतो व्योषवेल्लवरापुरैः ।
मरुद्रोगेष्वसाध्येषु सेव्यः (१) कैशोरकेण वा ॥

अथ वडवानलरसः

(२) रसबलिकुलिशानि स्युः पटून्यग्निजारो
जलनिधिशुभफेनः कान्तलोहोऽञ्जनश्च ।
भुजगरिपुगलाह्वं तालकं चेति तुल्यं
रविभवनवदुग्धैर्मर्दितं भावयेच्च ॥ ११४ ॥

---

(१) कैशोरकेण गुग्गुलुना ।

(२) रसः=पारदः । बलिः=गन्धकम् । कुलिशम्=वज्रम् । पटूनि=पञ्च लवणानि । तानिच--

सौवर्चलं सैन्धवञ्च विडमौद्भिदमेवच ।
सामुद्रेण सहितानि पञ्चस्युर्लवणानि च ॥

इति ज्ञेयानि । 'अग्निजारः' अम्बर इति प्रसिद्धम् । इदं च द्वीपान्तरीय वृष विशेष फेन रूपम् तथा चोक्तं निघण्टु विशेषे--

द्वीपान्तरीय वृषस्य फेनो रोमन्थजो ह्यम्बर नामधेयः ।
सौरभ्य सम्पन्न तृणाशनाद्यः कस्तूरिकातुल्य गुणाकरः स्यात् ॥

जलनिधिशुभफेनः=स्वच्छः सामुद्रः फेनपुञ्जः समुद्र भाग इति प्रसिद्धम् । कान्तलोहः'= कान्तलोहभस्म । 'अञ्जनम्'=सौवीराञ्जनम् । 'भुजगरिपुगलाह्वम्'=वृत्थकम् । 'तालकम्' हरितालम् । रविभवेति--सद्योदतार्कदुग्धैः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

गजपुटगतमेतद्भावयेत्काकमाची-
(१)कनक विषफलाह्वा-ब्राह्मिशोफाग्निनीरैः ।
तरणिवसुजयन्तीशालपर्णीद्विजीर-
त्रिवृदिति सुरसाह्वावासकानां जलेन ॥ ११५ ॥
(२) तिमिमाहिषमयूरच्छागपित्तैर्विमिश्रो
भवति रसवरोऽयं वाडवाग्निः प्रगल्भः ।
पवनजनितरोगान्संनिपातान्कफोत्था-
ञ्जयति हि निजवल्लः प्रोक्तरोगानुपानैः ॥ ११६ ॥

अथ रोगेभसिंहः

(३) सूतद्वयं घनवरानलवेल्लभार्ङ्गी
तिक्ताकटुत्रयविषैः सवचै रसः स्यात् ।

---

(१) कनकम् = धत्तूरबीजम् । इदञ्च शुद्धं ग्राह्यम्--

धत्तूरबीजं गोमूत्रे चतुर्यामोषितं पुनः ।
खण्डितं निस्तुषं कृत्वा योगेषु विनियोजयेत् ॥

'विषम्' = अमृतम् तच्च अभ्यवहारे नित्यं शुद्धमेव ग्राह्यं-शोधनं यथा--

कृत्वा चणकसंस्थानं गोमूत्रैर्भावयेत् त्र्यहम् ।
अथवा त्रैफले क्वाथे विषं शुध्यति पाचितम् ॥

फलाह्वा=त्रिफला । ब्राह्मि=प्रसिद्धा । शोफघ्नि=पुनर्नवा । एतेषां नीरैः=स्वरसैः तदभावे क्वाथैः । तरणिः=अर्कवृक्षः 'वसु'=वृद्धिः । 'जयन्ती'=स्वनामप्रसिद्धातिकृशाक विशेषः । 'शालपर्णी'=प्रसिद्धनामैव । 'सुरसाह्वा'=सम्भालुः । 'वासकम्'=वासा । एतेषां स्वरसेन क्वाथेन वा यथालाभम् ।

(२) तिमिः=सामुद्रो मत्स्यविशेषः ।

(३) 'सूतद्वयम्'=सूतभस्मनोर्भागद्वयं ग्राह्यम् । अन्यथा 'भागेऽप्यनुक्ते समता विधेया' इति वचनबलात् एक एव भागो गृह्येत ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

रोगेभसिंह इति बालकफामयघ्नः
सार्द्राऽयमल्पपुटितो विदितस्त्रिगुञ्जः । ११७ ॥

अथ कम्पवातारिः श्रीकण्ठगुटिका ।

(१) एतैर्गुडप्रमृदितैरसचर्चितैः स्यात् ।
श्रीकण्ठसंज्ञगुटिका तुलिता त्रिगुञ्जा ॥
शैत्यार्त्यजीर्ण कफवातभवान् विकारान् ।
हन्त्यार्द्रकद्रवयुताप्यथ केवला वा ॥ ११८ ॥

इति श्रीरसरत्न प्रदीपे क्षयादिवातव्याधिपर्यन्त-
चिकित्सानिरूपणो नाम
द्वितीयोऽधिकारः ।

---

(१) एतैः=रोगेभसिंहोक्तैः सूतद्वयादिभिः । तत्सर्वसमः गुडोग्राह्यः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अथ तृतीयोऽधिकारः।

अथ वातरक्तम्

(१) वाहनाभिरतस्यासृक् दूषयित्वाऽनिलो बली।
स्पर्शाज्ञत्वं मण्डलानि स्फुटनानि विचर्चिकाम् (२)॥१॥
करोत्यङ्गुलिवैकल्यं वातरक्तमिदं स्मृतम्।
कालातिक्रान्तमेतत्तु कुष्ठं भवति दुर्धरम्॥ २॥

अथ सर्वेश्वररसः

रसहिङ्गुललोहानां त्रयः कर्षाः पलं द्वयोः।
ताम्रगन्धकयोः सर्वं जम्बीराद्भिर्विमर्दयेत्॥ ३॥
विषमुष्ट्यर्कहेमस्नुक् क्षीरजलैः पुनः।
सप्तधा गोलकं कृत्वा स्वेदयेद्दिवसद्वयम्॥ ४॥
वालुकायन्त्रमध्यस्थं शीते निष्कं विषस्य च।
कर्षं कणानां सूतः स्यात्सर्वेशो वातरक्तजित्॥५॥
गुञ्जा मात्राऽस्य दातव्या द्वयं वा ऽमृतवारिणा।
रक्तप्रकोपणं तीव्रं (३)पित्तलं परिवर्जयेत्॥ ६॥

अथ शिलाजतुप्रयोगः

छिन्नोद्भवा कषायेण सेव्यं शुद्धं शिलाजतु।
पञ्चकर्म विशुद्धेन वातरक्तप्रशान्तये॥ ७॥

---

(१) 'वाहनाभिहतस्य' इति 'वेदनाभिहतस्य' इति च पाठान्तरमपि सम्यगाभाति।

(२) 'राज्योतिकरण्डूर्चिरुजः सुरूक्षा भवन्ति गात्रेषु विचर्चिकायम्' इति विचर्चिका स्वरूपम्॥ (३) पित्तलम्=पित्तकारि-वस्तु।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अथ अर्केश्वरोरसः

पलानीशस्य चत्वारि बलेर्द्वादश तावती ।
ताम्रस्य चक्रिका कार्या रसस्योर्ध्वं शरावकम् ॥८
दत्वा निरुध्य तद्भाण्डं पूरयेद्भस्मना दृढम् ।
अग्निं प्रज्वालयेद्यामद्वयं शीतं विचूर्णयेत् ॥ ९ ॥
पुटेद्द्वादशधा सूर्य्यदुग्धेनालोडितं पुनः ।
वरा(१) यावकभृङ्गाणां द्रवैस्त्रिस्त्रिर्विभावयेत् ॥१०
अयमर्केश्वरो वातरक्तमण्डलसुप्तिजित् ।
गुञ्जाद्वयं ददीतास्य लवणादि विवर्जयेत् ॥११॥

अथ शूलम्

भवेच्छिम्बी धान्यातिशयभजनाच्छूलमनिल-
प्रधानं तान्यष्टौ त्रिभिरथसमस्तैश्च युगलैः ।
अजीर्णे नेत्यस्मिन्भवति जठरे कुक्षियुगले
हृदि प्रौढाटोपो रुगति न मलानां विशरणम् ॥ १२

अथ त्रिपुरभैरवोरसः

भागौ रसस्य भागोऽथ हेम्नः पिष्टिं विधाय च ।
तयोर्द्वादशभागेन ताम्रपत्राणि लेपयेत् ॥ १३ ॥
ऊर्ध्वाधो गन्धकं दत्वा पत्रमात्रे समन्ततः ।
सिञ्चेन्मत्स्याक्षीनीरेण रुद्ध्वा यामचतुष्टयम् ॥१४

---

(१) 'यावक' मत्रालक्तकं (मैंहदी) ग्राह्यं नतु कुलात्थं रक्तशोधनाधिकारत्वात् ॥ अलक्तकं कफवातामयघ्नं रुच्यं रसायनञ्च भवति ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पचेच्छूलहरः सूतो भवेत्त्रिपुरेभैरवः।
क्षारस्य मृगशृङ्गस्य चूर्णं योज्यं समन्ततः॥ १५॥

माषो मध्वाज्यसंयुक्तो देयोऽस्य परिणामजे।
अन्येष्वेरण्डतैलेन हिङ्गुमात्रायुतो हितः॥ १६॥

अथ शूलगजकेसरी रसः

क्षारंकपर्दं विषसैंधवं च
व्योषान्वितं नागलता विमर्दितम्।
गुञ्जैकमात्रोऽनिलजे च शूले
विख्यात सूतो गजकेसरी स्यात्॥ १७॥

अथ अग्निमुखो रसः

रसबलिगगनार्कवेतसाम्लं विषं स्या-
त्सवरमिति पृथक्तद्भावयेद्यस्रमेतैः।
कनक भुजगवल्लीकण्टकारी जयाद्भिः
कमलशमिकवासामुष्टिकाद्रम्बुपूरैः॥ १८॥

अरुणसदृशशाकै(१)र्मातुलुङ्ग्याथ योज्यः
(२) पटुगण इह तुल्यो भावयेदार्द्रकाद्भिः।
दहनवदनसंज्ञो वल्लमात्रो निहन्ति
प्रबलपवनशूलं तद्विकारानशेषान्॥ १९॥

अथ शूलनिकृन्तनी गुटिका

शिवावचाहिङ्गुविषा (३) कलिङ्ग रुचकं समम्।
कर्षमुष्णाम्बुना सेव्यमनुपानं हि शूलिभिः॥२०॥

---

(१) बीजपूरकेणेत्यर्थः। (२) 'पटुगणः' = लवणपञ्चकमित्यर्थः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(३) 'कलिङ्गः' = इन्द्रयवः।

सूतं गन्धं विषव्योषवराभार्ङ्ग्यार्द्रवेल्लकम् ।
द्विर्वचाऽतिविषावन्हिः सर्वं तुल्यं गुडेन च ।
गुटिका चणिकोन्माना सर्वशूलनिकृन्तनी ॥२१॥

अथोन्मादः

कृष्णधत्तूरजैर्बीजैः पञ्चभिः पर्पटीरसः ।
साज्यो योज्यः प्रशान्त्यर्थमुन्मादस्यास्य नस्यतः२२

अथ भूतभैरवरसः

रसः सताळः सशिळः सलोहः
स्रोतोञ्जनं सार्कमिदं सगन्धम् ।
पिष्टं नृमूत्रेण समस्तमस्मा-
देयो द्विभागोऽथ बलिः पचेच्च ॥ २३ ॥
लोहे क्षणं हन्ति घृतेन माषोऽ-
पस्मारमस्योन्मदमानसत्वम् ।
पिबेदनुत्र्यूषणहिङ्गुयुक्तं
सर्पिर्नृमूत्रै रुचकेन सार्धम् ॥ २४ ॥
भूतोन्मादेषु सर्वेषु रसोऽयं भूतभैरवः ।
(१) स्वर्णजैः पञ्चभिर्बीजैर्देयं सर्पिर्विमिश्रितम् ॥२५

अथापस्मारः

शंखपुष्पी वचा ब्राह्मी कुष्ठमेषां रसैः सह ।
भस्मसूतः पर्पटी वा सेव्या ऽपस्मारशान्तये ॥ २६ ॥

(१) 'स्वर्णजैः' = धत्तूरजैः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

करञ्जदारु-सिद्धार्थ कटभीरामठं वचा।
सभङ्गा त्रिफला व्योषप्रियङ्गुश्च समान्यथ ॥ २७ ॥

बस्तमूत्रेण संपेष्य नस्यपानाञ्जनादिषु।
योज्यो योगो ऽयमुन्मादे ऽपस्मारे भूतरोगिणाम्॥२८

मयूरतुत्थं रस गंधयोः समं
गुडूचिकातोय विमर्दितं दृढम्।
शरावरुद्धं पुटितं प्रयत्ना—
दुन्मत्ततोयेन दिनं विमर्द्य ॥ २९ ॥

(१) स स्याद परस्मारसमीरवन्ह्यो
र्हैयंगवीनेन च वल्लयुक्तः।
हन्यादपस्मारकमेव यत्नतः
संसेव्यमानः कृतनिश्चयेन ॥ ३० ॥

जलेन नेत्रयोः क्षिप्तं वारमेकं शलाकया।
अपस्मारं जयत्याशु भूमिपानां विशेषतः ॥ ३१ ॥

———

अथ गुल्मः

हृद्वस्त्योरन्तरे ग्रन्थि र्जायते यश्चलाचलः।
स गुल्मः पञ्चधा दोषैः सर्वैश्चासृग्भवोऽपि च ॥३२

(१) 'अपस्मारसमीर वन्ह्योः' अर्थात् अपस्मारे यौ समीरवन्ही वातपित्ते तयोः, वातपित्तोल्वणापस्मारेऽपि हैयङ्गवीनेन नवनीतमाण्डः देयः स्यात्।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अथ वडवानलोरसः

सूताभ्रगन्धताप्यार्कयवक्षारं च मर्दयेत् ।
(१) अग्न्यम्बुनाऽहिपत्रेण सेव्यो वह्नोऽनिलोद्भवे ॥३३
हिङ्गुसौवर्चलं सिन्धु दाडिमं वेल्लमम्बुभिः ।
पिष्ट्वा (२) लुङ्गोद्भवैर्देयः कर्षोऽस्य सुरया सह ॥ ३४

अथ बंगेश्वरोरसः

सूतभस्म बंगभस्म पलद्वितयमाहरेत् ।
गंधकं मृततामं च प्रत्येकं द्विपलं मतम् ॥ ३५ ॥
अर्कक्षीरैर्दिनं मर्द्यं सर्वं तद्गोलकीकृतम् ।
रूद्ध्वा तद्भूधरे पाच्यं पुटकेन समुद्धरेत् ॥ ३६ ॥
एषवङ्गेश्वरो नाम्ना गुल्मप्लीहोदरं जयेत् ।
घृतैर्गुंजाद्वयं लेह्यं निष्कं श्वेतपुनर्नवां ।
गवां मूत्रैः पिबेच्चानु रजनीं वा गवां जलैः ॥ ३७ ॥

अथ उद्दामाख्योरसः

सूतालर्क शाक वृक्षस्य नीरैः
(३) सर्पाक्ष्याद्भिपेषयेद्घस्रमेकम् ।
भूमेः कुक्षौ पञ्चधैवं पुटित्वा
युज्ज्यात्तुल्यांश्चारु(४) नैकुम्भगर्भान् ॥ ३८ ॥

---

(१) 'अग्न्यम्बुना' = चित्रकजलेन । 'अहिपत्रेण' = नागवल्लीदलेन । 'सुरया' = मद्यसामान्येन । (२) 'लुङ्गोद्भवैः अम्बुभिः' = बीजपूररसैः ॥
(३) 'सर्पाक्षी' = नाकुलीकन्दः । 'शाकवृक्षस्य' = 'सागवान्' सेगुण इति वा प्रसिद्धस्य । (४) 'नैकुम्भगर्भान्' = अन्यपालवीजान्तर्गतसारभागान् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

उद्दामाख्यः स्याद्रसः सर्पिषाऽयं
गुञ्जायुग्मात्पित्तशूलं निहन्ति।
द्राक्षापथ्याक्वाथ एवानुपानं
वर्ज्यं सर्वं पित्तलं दाहकारि ॥ ३९ ॥

अथ विद्याधरोरसः

सूतो गन्धस्तालकस्ताम्रताप्ये
तुल्यं सर्वं (१) हृच्छिलाचेति पिष्ट्वा।
कृत्वा क्वाथैः स्नुग्भवैः क्षीरपूरै
र्घस्रं सूतो नाम विद्याधरः स्यात् ॥ ४०
निष्कार्धोऽयं श्लेष्मगुल्मं निहन्यात्
प्लीहानं च क्षौद्रयुङ्मूत्रपानात्।
आदौ गुल्मे रक्तमोक्षं विधाय
प्रौढः कार्य्योऽयं विधिः (२) सर्वजेऽपि ॥ ४१
तिलक्वाथं पिबेदाज्यभार्ङ्गीव्योषगुडान्वितम्।
पुष्परोधे रक्तगुल्मे स्त्रीभिर्विद्याधरादनु ॥ ४२
सूतगन्धकणापथ्यातुत्थारग्वधकान् दृढम्।
मर्दयेद्वज्रिदुग्धेन माषार्धं खादयेद्दिनम् ॥ ४३
(३) स्त्रीणां जलोदरं हन्ति पथ्यं शाल्योदनं दधि।
चिञ्चाफलरसं चानुपानमस्मिन्प्रयोजयेत् ॥ ४४

(१) मनःशिलेत्यर्थः। (२) 'सर्वजे' = त्रिदोषजे शूले।

(३) यद्यप्ययं योगः स्त्रीपुरुषसर्वसाधारणजलोदरप्रभृतिरोगेषु प्रचलति तथापि 'स्त्रीणाम्' इति विशिष्य सम्बन्धोपादानं तासामार्त्तवविबन्धादिदोषेष्वपि योज्य इति बोधनाय ज्ञातव्यम्।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अथ मेहः

कफकृन्ति समस्तानि मेहानामादिकारणम् ।
ते विंशतिर्दश कफात्षट् पित्तात् पवनात्परे ॥ ४५
साध्या याप्या असाध्याः स्युः क्रमेणाप्यक्रियावताम् ।
मधुमेहत्वमायान्ति तदाऽसाध्या भवन्ति हि ॥ ४६

अथ मेघनादरसः

सूतं कान्तं गन्धतीक्ष्णताप्यव्योषं फलत्रिकम् ।
शिलाजतु शिलाऽङ्कोलबीजं रात्रिः कपित्थकम् ॥ ४७
त्रिः सप्तकृत्वो भृङ्गाद्भिर्भावयेन्निष्कसंमितः ।
मेघनादाख्यसूतोऽयं सर्वान्मेहान्प्रणाशयेत् ॥ ४८
महानिम्बस्य बीजानि पेषयेत्तण्डुलाम्बुना ।
सघृतान्यचिराद्धन्युः पानान्मेहांश्चिरोत्थितान् ॥ ४९

अथ हरिशंकररसः

सूताभ्रमामलकैर्जलैः सप्ताहं भावयेद्रसः ।
हरिशंकरसंज्ञः स्याद्भुक्तः पित्तप्रमेहजित् ॥ ५०

अथ मेहभैरवः

रसं गधं विषं लोहं जातीपत्रं च तत्फलम् ।
अग्निशोषाहिफेनं च खुरासानं च चित्रकम् ॥ ५१

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

देवपुष्पं समं सर्वं चित्रमूलकषायकैः ।
यथासात्म्येन संयोज्यं सर्वमेहापनुत्तये ॥ ५२
अर्शांसि ग्रहणीशोथपाण्डुशुक्रक्षयं नृणाम् ।
यथानुपानतो योज्यः सिद्धः श्रीमेहभैरवः ॥ ५३

अथ बङ्गेश्वरोरसः

रसस्य भस्मना तुल्यं बङ्गभस्म प्रकल्पयेत् ।
अस्य माषद्वयं हन्ति मेहान्क्षौद्रसमन्वितम् ॥ ५४
अयं बङ्गेश्वरो नाम (१) सर्वयोगिषु सम्मतः ॥
एला सकर्पूरसिता सधात्री
जातीफलं गोक्षुरशाल्मली त्वक् ।
सूताभ्रबङ्गायसभस्म सर्व-
मेतत्समानं परिमर्दनीयम् ॥ ५५
निष्कार्धमात्रं मधुनाऽवलेह्यं
निहन्ति सर्वामयमेहजातम् ।
अयं रसो मेहगजेन्द्रसिंहः
कुमारतन्त्रादिषु सुप्रसिद्धः ॥ ५६
गुडूचिका शाल्मलिकाकषायैः
निष्कार्धमाना मधुना पिबेद्वा ।
वद्धा वटी चन्द्रकलेति संज्ञा
सर्वप्रमेहेषु नियोजनीया ॥ ५७

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(१) 'सर्वयोगिषु'=योगप्रयोक्तृषु भिषक्षु इत्यर्थः ।

कुलित्थचणकोद्दालश्यामाकाढकीकोद्रवाः ।
पुराणा मेहिनां पथ्या अस्निग्धाः(१)जाङ्गला रसाः५८
प्रमेहनाशे पिटिका यान्ति सर्वाः प्रमेहिणाम् ।
व्रणप्रतिक्रियायान्तु चिकित्सान्यत्र कथ्यते ॥ ५९

अथ भगन्दरः

वृषणाधारमध्यो यः स देशो भगसंज्ञकः ।
तमेवदारयत्यस्माद्भगन्दर इति स्मृतः ॥ ६०
अपक्के वा विपक्के वा जलौकापातनं हितम् ।
अभावे तुम्बशृङ्गाभ्यामामरक्तस्य मोक्षणम् ॥ ६१
शक्राव्हा चित्रकं दन्ती सैन्धवं च पलोन्मितम् ।
गवां मूत्रे विनिक्षिप्य कषायं परिकल्पयेत् ॥ ६२
कषायतुर्य्यभागेन तैलं क्षिप्त्वा विपाचयेत् ।
कुकलासं विनिक्षिप्य तैलमुत्तारयेद्बुधः ।
भगन्दरस्त्रिसप्ताहान्नूनमेष विनश्यति ॥ ६३

अथ रवितारण्डवरसः

भागो रसस्य गन्धस्य द्वौ कन्याद्भिर्विमर्दयेत् ।
कृत्वा गोलं ताम्रपात्रं तावत्तस्योपरि क्षिपेत् ॥६४॥
भस्मनाऽऽपूर्य तद्भाण्डमग्निं कुर्याद्दिनं तले ।
शीतमुद्धृत्य जम्बीरवारा तत्सप्तधा पुटेत् ॥ ६५ ॥

---

(१) जाङ्गला रसाः—जाङ्गलहरिणादिमांस रसाः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

गुञ्जाऽस्य मधुसर्पिर्भ्यां हन्ति घोरं भगन्दरम् ।
रवितार्ण्डवनामायं रसो भैरवनिर्मितः ॥६६॥
तालमूलीं सलशुनां पिबेदनु सकाञ्जिकाम् ।
क्षालनं त्रिफलाक्वाथैर्मार्जारास्थिप्रलेपनम् ।
स्वादु सेव्यं त्यजेच्छीतं दिवास्वप्नादिमैथुनम् ॥६७॥

अथ मूत्रकृच्छ्रम्

रसवल्लयवक्षारं सितातक्रयुतं पिबेत् ।
(१) मूत्रकृच्छ्राण्यनेकानि लभन्तेऽनित्यताञ्जवात् ॥६८

अथाश्मरी

निरुध्य मूत्रमार्गं या यातनां जनयेद्भृशम् ।
कटिबस्तिप्रदेशेषु साऽश्मरीति निगद्यते ॥६९॥

अथ त्रिविक्रमोरसः

निर्गुण्डिकाद्भिर्बकिसूततात्रं
विमर्द्य गोलं सिकताख्ययंत्रे ।
पक्त्वाऽस्य वल्लः किल मातुलुङ्गी-
जलैर्निहन्त्यश्मरि रोगमुग्रम् ॥ ७० ॥
नाम्नात्रिपूर्वः खलु विक्रमोयं
त्रिविक्रमेणैव कृतः प्रसिद्धः ।

---

(१) 'प्राप्नुवन्ति क्षयं सद्यः' इति पाठान्तरम् ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वैद्यो विबुद्धः कृतरोग संज्ञो-
प्युपाचरेत्साधुजनानुवादी ॥ ७१ ॥
घृतोषणैर्लोकनाथः सेव्यो वल्लमितस्ततः ।
चतुर्गुणाज्यदुग्धेन जातीमूलं पलं पचेत् ॥ ७२ ॥
शीतं तत्ससितं हन्ति मूत्रकृच्छ्रं सुदारुणम् ।
शिग्रुमूलभवः क्वाथः सुखोष्णोऽश्मरिपातनः ॥७३॥

अथ लिंगदोषः

अधावनाद्योनिदोषाद्विपरीतरतादिभिः ।
पंचोपदेशा जायन्ते लिङ्गे पित्तोच्छ्रयादपि ॥ ७४ ॥
समाषां त्रिफलां लोहपात्रे भृष्टां विचूर्णयेत् ।
हन्ति क्षौद्रेणलेपोऽस्य लिङ्गदोषानशेषतः ॥ ७५ ॥
रोगेभसिंहवेल्लादि (१) पुरेणैवानुशीलयेत् ।
क्षालयेत्त्रिफलाक्वाथैः लिङ्गं पूयाविशुद्धये ॥७६॥

अथार्शः

त्रिभिर्दोषैः समस्तैश्च शोणितात्सहजान्यपि ।
गुदाङ्कुराः षट्प्रकारा ज्ञेया गुदवलित्रये ॥ ७७ ॥

अथ चञ्चत्कुठारोरसः

दद्यात्सूतवरस्य भागयुगलं गन्धस्य लोहाभ्रयोः ।
षड् बिल्वोऽग्निहलोषण त्रयरजोदन्ती च भागाः पृथक्

(१) पुरः = गुग्गुलुः ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पञ्च स्युः (१) स्फुटटङ्कणस्य च यवक्षारस्य सिन्धूद्भवा
भागाः पञ्च गवां जलं सुविमलं द्वात्रिंशदेतत्पचेत् ७८
स्नुग्दुग्धं च गवाजलावधि इतिपिण्डेकृतेतद्भजे—
माषार्धं द्वौमाषौ गुदकीलकाननुजटाचश्चत्कुठारोरसः।
शिम्बीधान्यविकार माहिषदिवास्वापादि सर्वंत्यजे-
दंशेलोहमवार्गलां क्षणमथो कृत्वात्रजेद्वाक्वचित्"॥(२) ७९
पात्रे लोहमये दृढे सुविमले यावद्घनं तद्भवेत्।
माषार्धेन मितो निहन्ति सकलानर्शोभवान् कीलकान्॥
कासश्वास निबन्धमूत्रजरुजामुच्छेददक्षः परः
सोऽयं वैद्यवरैर्विविच्य रचितश्चश्चत्कुठारोरसः।
शिम्बीधान्यविकारमाहिषदिवा स्वापादि सर्वं त्यजेद्-
अर्शोराक्षसभीतिनाशनपरो रोगी सुपथ्यं भजेत् ॥८०

अथ अर्शःकुठारोरसः

वचाबाल्हीकबेल्लानिसिन्धुजीरकनागरम्।
ऊषणं मागधी कुष्ठं पथ्या (३) हल्युपगन्धिका ॥८१
क्रमाद्वृद्धमिदं योज्यं द्विगुणेन गुडेन च।
पिबेत् कदुष्णनीरेण कर्षमर्शः प्रणाशनम् ॥ ८२

---

(१) फुल्लितटङ्कणस्य (२) अयं पाठोऽशुद्धिबहुलो ऽलग्नार्थकश्च इति अस्माभिरेतस्य स्थाने ७६ श्लोकाग्रे श्लोकान्तरं रचयित्वा निवेशितं युक्तायुक्तत्वं सुधीभि र्ज्ञेयम् ॥

(३) 'सूतकगन्धकम्' इति पाठं समीचीनं मन्ये, अन्यथा सर्वत्र योगेषु सूतप्रधानेषु अत्र तदभावान्न्यूनतापत्तेः ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अथ तीक्ष्णमुखरसः

सूताभ्रहेमतीक्ष्णार्कमुण्डपण्डूरगन्धकम् ।
ताप्यं कन्याम्बुना पिष्टं मधुमूषागतं पचेत् ॥ ८३
त्र्यहं तुषाग्नौ माषोऽस्य सासितः पित्तकीलनुत् ।
अस्य तीक्ष्णमुखस्य स्यादनुपानं मधूत्तमम् ॥ ८४

अथ लेपौ

सिन्धूत्थदेवदाल्याश्च बीजं काञ्जिकपेषितम् ।
गुदाङ्कुरान्प्रलेपोऽयं पातयत्पुल्वणानपि ॥ ८५
स्वर्णपुष्पी प्रसूनानि लोहं (१) द्विरदपिप्पली ।
शिलाजलेन लेपोऽयं गुदाङ्कुरनिपातनः ॥ ८६
देवदालीकषायेन शौचमाचरतां नृणाम् ।
गुदनिःसरणं नैव नापि स्युर्गुदकीलकाः ॥ ८७
पथ्या गुडाग्निकतिलैः श्लेष्मोत्थांस्ताम्रपर्पटी ।
हन्ति व्यायामशीलस्य तक्रं प्रपिबतः सदा ॥ ८८
अयमेव विधिः कार्य्यः सन्निपातोद्भवेष्वपि ।
अर्शःसु रक्तजातेषु सहजेषु च धीमता ॥ ८९
(२) गलां कृष्णातु तन्मध्ये रसराजं विनिक्षिपेत् ।
तस्योपरि सुचूर्णं च प्रक्षिपेत्सुविशारदः ॥ ९०
मृद्वग्निं ज्वालयेत्पश्चाद्दार्व्या संचालयेच्छनैः ।
यदा भस्मीभवेत् ग्राह्यं देयं गुञ्जात्रयं सह ॥ ९१

---

(१) गजपिप्पली । (२) 'विधे रन्ध्रं विधायाथ' इति पाठः समीचीनो भाति ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

टङ्कद्वितयचूर्णेन छिक्कणी सुप्रशस्तयोः ।
आ सप्ताहात्सुविदितं हंत्यर्शो नात्र संशयः ॥९२

अथ ग्रहणी

अथामसंचयादेष जायते ग्रहणीगदः ।
क्वचिदामं क्वचित्पक्वं सार्यतेऽस्मिन्सरुक् द्रवम् ॥ ९३
अग्निमान्द्यं ज्वरः शोथो वैवर्ण्यमरुचिस्तृषा ।
क्षयचिन्हान्यपि भवन्त्यतिवृद्धे महागदे ॥ ९४

अथ वज्रकपाटरसः

सूतगन्धयवक्षार टङ्कणाभ्रजयावचाः ।
जयन्तीभृङ्गजम्बीरद्रवैः पिष्ट्वा दिनत्रयम् ॥ ९५
यामार्धं गोलकः स्वेद्यो मन्दाग्नावत्र योजयेत् ।
शीते जयारससमां शाल्मलीञ्च जयाद्रवैः ॥ ९६
भावयेत्सप्तधा वज्र कपाटः स्याद्रसोत्तमः ।
माषद्वयं त्रयं वाऽस्य मधुना ग्रहणीं जयेत् ॥ ९७

अथ कनकसुन्दरः

शुद्ध सूत समं गन्धं मरिचं टङ्कणं कणा ।
धूर्तबीजं समं मर्द्यं भृङ्गद्रावैर्दिनार्धकम् ॥ ९८

(अर्शोघ्नः पारद भस्म प्रकारः)

अधः पुष्पी कुक्कुटाण्डकचूर्णयोः खर्परोपरि गर्त्तं कृत्वा मध्ये पारदं क्षिप्त्वोपरि चूर्णं प्रक्षिप्याधो मृद्वग्निं प्रज्वालयेत् पश्चात् दर्व्या शनैः शनैश्चालयेत्पारदो भस्मीभवति । तद्भस्म रक्तिकाछिक्कणीद्वर-द्वरस्यावचूर्णं टङ्कणद्वयेन भक्षणादासप्ताहादर्शः क्षयंयाति ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सूततुल्यं विषं योज्यं रसः कनकसुन्दरः ।
योज्यो गुञ्जाद्वयं हन्ति वातातीसारमुद्धतम् ॥ ९९

अथ हंसपोटलीरसः

रसगन्धकमुक्तानां विषस्यैकं पलं भवेत् ।
तीक्ष्णतुत्थकयोश्चैकं पलं तत्सुरसाद्रवैः ॥१००॥
विष्णुक्रान्ता वन्हिपर्णी हलीभृङ्गैर्विमर्दयेत् ।
गोलं संस्वेदयेदस्य मन्दाग्नौ चरणांशकम् ॥१०१॥
विषं दग्धकपर्दानां चूर्णं तुल्यं नियोजयेत् ।
आर्द्रजम्बीरनीरेण घृष्टं स्याद्धंसपोटली ॥१०२॥
सोषणो वा समधुको माषोऽस्य ग्रहणीगदम् ।
अतिसारं पाण्डुरोगं गुल्मं कार्श्यं ध्रुवं जयेत् ॥१०३॥
क्षौद्रेण विजयानिष्कमनुपानं प्रयोजयेत् ।
उत्तमा विदिता चैषा क्रियते वैद्यराजकैः ॥१०४॥

अथ कनकप्रभा गुटिका

सुवर्णबीजं मरिचं मराल-
पादं कणं टङ्कणकं विषं च ।
गन्धं जयाद्भिर्दिवसं विमर्द्य
गुञ्जा प्रमाणां वटिकां विदध्यात् ॥१०५॥
एषाऽतिसारं ग्रहणीं ज्वराग्नि-
मान्द्यं निहन्यात्कनकप्रभेयम् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

दध्योदनं पथ्यमनुष्णवारि
रसं भजेत्तित्तिरिलावकानाम् ॥ १०६ ॥

अथ विजया गुटी

वरीवानारिका मुण्डी वासाब्दामृतदुग्धिका ।
सैन्धवं द्विगुणा योज्या जया सर्वं गवां पयः ॥१०७

योज्यं दशगुणं वन्हौ पचेद्यावद्घनं भवेत् ।
पलार्धं सेवयेदस्य मधुना सर्पिषा सह ॥ १०८

विजया गुटिका हन्ति समस्तान्ग्रहणीगदान् ।
अतिसारं च दध्यन्नं पथ्यमार्द्रकसंयुतम् ॥१०९

अथातिसारः

रसः प्रवृद्धः शमयेदन्तराग्निं तदा भवेत् ।
अतिसारस्त्रिभिः सर्वैर्दोषैः शोकात्तथा मतः ॥११०

अथ मृतसंजीवनोरसः

रसगन्धौ विषं सूतपादभागं समं च तैः ।
गगनं भावयेद्धस्रं रसैः सर्वं विचूर्ण्य तत् ॥ १११

सर्पाक्षी धातकी स्वर्णं विषा विश्वं जलाम्बुदा ।
यवानीबिल्वधान्यानि जीरंपाठा कणा शिखी ॥११२

कुटजत्वक्कपित्थं च दाडिमं सकलिङ्गकम् ।
अमीषां गोलकं यामं वालुकायन्त्रगं पचेत् ॥११३

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मृतसंजीवनो नाम रसः स्यादस्य वल्लकः ।
षट् प्रकारमतीसारं हन्त्यनेनानुशीलनात् ॥११४

अथ अतिसारकुठारोरसः

विषाब्दधातकीविश्वायवान्यम्बुकणं वचा ।
कुटजो धान्यकं बिल्वपाठेन्द्रयवशाल्मलि ॥११५
हिङ्गुलश्च समं चैषां चूर्णेन मधुना सह ।
ग्रहणीरोगहृत्सर्वं योज्यं तच्चातिसारके ॥ ११६

अथ अतिसारभैरवो रसः

हिंगुलं वत्सनागं च मरिचं टंकणं कणा ।
वटिका जंभलरसैः कृता सर्वातिसारजित् ॥११७

अथ शोथः

समूत्रः सवराचूर्णो वल्लो देयः सुधानिधेः ।
शोथरोगं निहन्त्येष सप्तरात्रानुशीलनात् ॥ ११८

अथ कृमिरोगः

कृमयो विंशतिविधा जायन्ते ऽजीर्णभोजनात् ।
अतीसारो ज्वरो वान्तिः शूलं तेषामुपद्रवाः ॥ ११९

अथ कृमिमुद्गरः

क्रमेण वृद्धं रसगन्धकाजमोदाविडङ्गं विषमुष्टिकं च ।
पलाशबीजं च सुचूर्णमस्य निष्कंप्रमाणं मधुनाऽवलीढम् ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पिबेत्कषायं घनजं तदूर्ध्वं रसोऽयमुक्तः कृमिमुद्गराख्यः।
कृमीन्निहन्ति क्रिमिजान्विकारान् सन्दीपयत्यग्निमयं त्रिरात्रात्॥१२०

अथ कृमिघातिनी वटिका

जीरीमुष्टिककाम्पिल्लकृमिघ्नब्रह्मबीजतः।
एकद्वित्रि चतुः पञ्च तिन्दुबीजस्य षट् क्रमात्॥१२१
संचूर्ण्य मधुना सर्वं गुटिका कृमिघातिनी।
तां खादन्पिबेत्पश्चाद्विडङ्गस्य श्रितं नरः।
आखुकर्ण्याः शर्कराढ्यं कषायं वा पिबेत्सुधीः॥ १२२

अथ हृद्रोगः

द्रवस्निग्धोष्णशीतादि-सेवनाज्जायते गदः।
हृद्ग्रहो वमनोत्क्लेद-वन्हिमान्द्यादिलक्षणः॥१२३

हृद्रोगकेसरीरसः

(१) वाल्हीकविश्वदहनामययावशूकैः
पथ्याभया विडकणारुचकैर्निहन्यात्।
सूतः सपुष्करजटो यववारिपीतो
हृद्रोगमग्निविकलत्वमतिप्रवृद्धम्(२)॥ १२४

इति श्रीरत्नदेवसुत श्रीरामराजविरचिते
रसरत्नप्रदीपे वातरोगादिहृद्रोगान्तचिकित्सानिरूपणोनाम
तृतीयोऽधिकारः।

(१) वाल्हीकं=कुङ्कुमम्। (२) एनं समस्तं योगं 'हृद्रोगवैरी'=अर्जुनवृक्षः इत्यस्य त्वचः क्वाथेन त्रिर्भावयेत् इत्यस्माकमत्यावश्यकं भाति।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अथ चतुर्थोऽधिकारः ।

अथ ज्वरः

सर्वाङ्गव्यथनं पूर्वरूपमिच्छाविपर्य्ययः ।
ज्वरे संतापहृल्लासवन्हिमान्द्यं बलक्षयः ॥ १
वातिके जृम्भणं पीडा दाहस्तृष्णा च पित्तजे ।
कफोत्थे भोज्यविद्वेषो द्वन्द्वजे मिश्रितं त्विदम् ॥ २
संज्ञाविनाशो रसना-खरत्वं
चिराद्विपाकः पवनादिकानाम् ।
चिन्हं त्रिदोषे कथितं भिषग्भिः
कालुष्यमक्ष्णोररतिः प्रलापः ॥ ३
अपथ्यैरविशिष्टेभ्य एभ्य एव समुद्भवः ।
दाहशीलादि चिन्हानामागन्तूनां त्रिभिः सदा ॥ ४

अथ उदकमञ्जरीरसः

सूतो गन्धः सोषणष्टङ्कणः स्यात्
एतैस्तुल्या शर्करामत्स्यपित्तैः ।
भूयो भूयो भावयेत्तत्त्रिरात्रं
वल्लो देयः शृङ्गवेरस्य वारा ॥५
सिञ्चेत्तापे वारिणा तक्रभक्तं
वृन्ताकाद्यं पथ्यमेव प्रदिष्टम् ।
संप्रोक्तो वार्मंजरीति प्रसिद्धो
नाम्ना वैद्यैः शास्त्रदृष्ट्या ज्वरारिः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अन्हैवोग्रं हन्ति सामं प्रभावात्
पित्ताधिक्ये मूर्ध्नि वारि प्रयोगः ॥ ६

अथ ज्वरधूमकेतुः

भवेत्समं सूतसमुद्रफेनहिङ्गूलगन्धं परिमर्द्य यामम्।
नवज्वरे वल्लयुगं त्रिघस्रमार्द्राम्बुनाऽयं ज्वरधूमकेतुः॥७

ज्वरांकुशः

क्रपेण वृद्धात्रसगंधहिङ्गुलान्नैकुम्भगर्भानथदन्तिवारिणा।
पिष्ट्वाऽस्य गुञ्जाऽभिनवज्वरापहा दलेन चान्हःसितया प्रयोजिता॥८

अथ गदमुरारिः

रसवलि(१) फणिलोहव्योष ताम्राणि तुल्या—
न्यथ रसदलभागो नाग एतत्प्रपिष्टम्।
भवति गदमुरारिश्चास्य गुञ्जाऽऽर्द्रवारा
क्षपयति दिवसेन प्रौढमामज्वराख्यम् ॥ ९

अथ विद्याधरोरसः

रसो गन्धस्ताम्रं त्रिकटु कटुकीटङ्कणवरां
त्रिवृद्दन्ती (२) हेमद्युमणि विषमेतत्समभिदम् ॥१०

---

(१) 'फणिः' = विषम्। 'नागः' = सीसकम्।

(२) हेम = धत्तूरम्। द्युमणिः = अर्कः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

समस्तैस्तुल्यं स्यात् विमलजयपालोद्भवरज-
स्ततः स्नुक्क्षीरेण प्रगुणमृदितं दन्तिसलिलैः ॥ ११
त्रिगुञ्जाऽस्य प्रौढं जयति वटिका साममतुलं
ज्वरं पाण्डुं गुल्मं ग्रहणिगुदकीलोद्भवरुजः ।
मरुच्छूलाऽजीर्णं पवनमथ सामं कृमिगदं
विबन्धं प्लीहानं प्रबलमपि विद्याधररसः ॥ १२

अथ त्रैलोक्यडम्बरोरसः

सूतार्कगन्धचपलाजयपालतिक्ता
पथ्या त्रिवृच्च विषतिन्दुकजं समांशम् ।
निष्पिष्य वज्रिपयसा मधुनैकरात्रि-
स्त्रैलोक्यडम्बररसोऽभिनवज्वरघ्नः ॥ १३

अथ भस्मेश्वरोरसः

भस्म षोडषनिष्कं स्यादारण्योपलकोद्भवम् ।
निष्कत्रयं च मरिचं विषं निष्कं च चूर्णयेत् ॥ १४
अयं भस्मेश्वरो नाम सन्निपातान्तको भवेत् ।
पञ्च गुञ्जश्चतुर्गुञ्जस्त्रिगुञ्जो वा द्विगुञ्जकः ॥१५
नस्यतः शिरसः पीडा नासापीडाश्रुतेस्तथा ।
भक्षणादुरसः पीडा वयोबलविचारतः ।
पञ्च गुञ्जामितं खादेदथवानन्दभैरवम् ॥ १६

अथ वैरोचनोरसः

रसगन्धमरीचानि समानि जयपालकैः ।
दन्तीक्वाथेन यामैकं पिष्टो वैरोचनो रसः ।
द्विवल्लं शूलविष्टम्भानिलमामज्वरं जयेत् ॥१७॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अथ प्राणेश्वरोरसः

पुनर्नवा हाटकवेणिका च पाठा सदुग्धा कलहप्रिया च ।
आसां द्रवैः सूतवरः प्रपिष्टः स्विन्नः सगन्धेन चतुर्गुणेन १८

योज्योऽथ मर्द्यो हलिनी जलेन
ब्राह्मी (१) सहास्वर्णपुनर्नवानाम् ।
(२) कासघ्नपाची हरिवल्लभानां
दिनत्रयं गोलमथो विधाय ॥ १९ ॥

स्थाल्यां पचेत्तत् सिकताख्ययन्त्रे
रसैरमीभिर्दिवसं रसः स्यात् ।
(३) "प्राणेश्वरः शुष्कतमेऽल्पभृष्टे
कटुत्रयं टङ्कणयुक्कलांशम् ॥ २० ॥

---

(१) "सहा"=स्वर्णक्षीरी 'सत्यानासी' इति प्रसिद्धम् । 'स्वर्णम्'=धत्तूरम् ।

(२) 'कासघ्नः'=कासमर्दः 'कसौंदी' इति प्रसिद्धम् । 'हरिवल्लभा'=तुलसी ।

(३) अस्मद्भावनया निम्नदर्शितस्वरूपेण " " इति चिन्हान्तर्गतपाठः पठनीयः—

"प्राणेश्वरः शोफहरः प्रदिष्टः पुष्टिप्रदो बुद्धिविवर्धनश्च ।
माषप्रमाणस्त्रिकुटायुतोऽयं सटङ्कणः स्याद्धलवर्णकारी ॥
आदौ तथान्ते ससितं प्रयुञ्ज्यात् प्रवक्ष्यमाणेषु गदेषु योगम् ।
भिषग्वरो रोगिबलाबले च निरीक्ष्य कालादिकमप्रमत्तः ॥

अत्रेदं बोध्यम्—

"दूष्यं देशं बलं कालमनलं प्रकृतिं वयः ।
सत्त्वं सात्म्यं तथाऽऽहारमवस्थाश्च पृथग्विधाः ॥
सूक्ष्मसूक्ष्माः समीक्ष्यैषां दोषौषधनिरूपणे
यो वर्त्तते चिकित्सायां न स स्खलति जातुचित्" ॥

इति वाग्भटोक्तेः अत्र 'रोगबलाबले' इति पदेन उपलक्षणरीत्या ॥ दूष्यदेशादि सर्वमेव विवेच्यम् ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अस्मिन्प्रयुञ्ज्याद्बलवर्णकान्ति-
पुष्टिप्रदे बुद्धिमुखोद्गते च ।
आदौ तथान्ते ससितो द्विमाषः
प्रवक्ष्यमाणेषु गदेषु देयः" ॥ २१ ॥
ज्वरे त्रिदोषप्रभवे क्षये च
श्वासे सकासे ग्रहणीगदे च ।
गुल्मेऽथ पित्तासृतिपाण्डुरोगे
तथाऽतिसारे प्रबलेऽतिरूक्षे ॥ २२ ॥
ततस्तु तैलेन विमर्द्य देहं
मूर्ध्न्यंसयुग्मेऽङ्घ्रियुगस्य सन्धौ ।
सीमन्तिनीनां करपल्लवस्थैः
सुवर्णकुम्भैः सलिलप्रयोगम् ॥ २३ ॥
विण्मूत्ररोधेऽपिच सन्निपाते
ज्वरेऽप्यजीर्णे कुशलैर्विदध्यात् ।
कण्ठावरोधे ग्रहणीगदे च
गुल्मेष्वतीसारनिपीडितेषु ॥ २४ ॥
पाण्डौ क्षये सेवनमस्य युक्तं
पित्तासृजि क्षीणतमे जरत्सु ।
अन्येषु योगेषु विचार्य शक्तिं
देयस्तु योगः सकलामयघ्नः ॥ २५ ॥
देयो न कुष्ठे न च भूतदोषे
क्षुध्यादिते नैष रसः कदाचित् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अन्याञ्जयत्येव गदान्स्वशक्त्या
सम्यक् प्रयुक्तः सकिलप्रयोगात् ॥ २६ ॥
दध्योदनं शर्करया समेतं
पथ्यं च मुद्गाम्बुहितं कृशेऽल्पम् ।
वृन्ताकचिञ्चाफलजीरकाणि
सदा हितान्यत्र च कारवेल्लम् ॥ २७ ॥
शृंगी विषं (१)भोगि (२)महाविषं स्या-
च्छुद्धं समं सूतकगन्धकं च ।
एकाधिका विंशतिर्वासराणां
निधाय यत्नेन जलप्रवेशे ॥ २८ ॥
गुञ्जैकमानः सघृतः प्रलिप्तो
नवज्वरे संततकाधिके च ।
अभ्यंगमात्रेण निहन्ति सर्वा-
न्यथा भुजंगं गरुडो गरिष्ठः ॥ २९ ॥
(३) रोमादिवेधांतसुसिद्धनामा
राजा रसानां कथितो भिषग्भिः ।
राज्ञा पुरः कौतुकमद्भुतार्थं
सत्कीर्तितं वैद्यकुमारकाभ्याम् ॥ ३० ॥

अथ ज्वरसूदनः

समेभ्योरगटङ्केभ्यो द्विगुणाञ्जयपालकान् ।
पिष्ट्वा नवज्वरेदेयं वल्लं जृम्भाम्भसाऽस्य च ॥३१

(१) सर्पविषे (२) तन्नामक कन्द विषे काल सर्पे च (३) यत्राधुनिकाः इञ्जैक्शन Hypodermic or Intravenous injection. कर्मद्वारा त्वचि नाड्यां वा भैषज्यं प्रयुञ्जते प्राञ्चस्तु रोमकूपद्वाराऽपि तीक्ष्णान् रसान् अतीवसूक्ष्मया मात्रया त्वचि प्रलिप्योपचरन्ति स्मेति महद्गौरवमस्याश्चिकित्साया इति जानीमहे, अतएव ग्रन्थकर्ता 'अभ्यङ्गमात्रेण' इत्यादि सबलमुक्तम् ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

चिञ्चाक्षारेण खण्डेन शीतज्वरविनाशकृत् ।
अयमामानिलहरः शिवागुडयुतो रसः । ३२

अथ कालाग्निरुद्रः

(१) क्षारैश्च लवणैः सूतं मर्दयेद्दिवसं ततः ।
स्वेदयेद्राजिकाहिङ्गु विषमूषोदरे स्थितम् ॥ ३३
काञ्जिके दोलिकायन्त्रे पुनस्तं मर्दयेद्रसम् ।
(२) गिरिकर्णी तिलदली निर्गुण्डी काकमाचिका ॥ ३४
मण्डूकी कनकं भृङ्गः करवीरः सचित्रकः ।
पाठा जयन्त्यार्द्रकं च द्रवैरेषां क्रमात्ततः ॥ ३५
रससाम्येन योज्योऽत्र गन्धको मरिचानि च ।
भावयेत्पञ्चभिः पित्तैः पृथग्घर्मे दिनावधि ॥ ३६
रसः कालाग्निरुद्रः स्याद्द्विगुञ्जः संनिपातजित् ।
अनुपानं सिताक्षौद्रं शेषं प्राणेशवद्भवेत् ॥ ३७

अथ पञ्चवक्त्ररसः

रसो गन्धकष्टङ्कणः सोषणोऽयं
फणी-पिप्पली-व्योष-धत्तूरपिष्टः ।
जयेत्संनिपातं द्विगुञ्जोऽनुपानं
भवेदर्कमूलाम्बुसव्योषचूर्णम् ।

(१) 'क्षारैः' = सर्जक्षारैः यवक्षार टङ्कणक्षारैः । 'लवणैः' = पञ्चलवणैः पूर्वमुक्तैः ।
(२) 'गिरिकर्णी' = विष्णुक्रान्ता श्वेताऽपराजिता च । 'तिलदली' = तिलपर्णी रक्तचन्दनमित्यर्थः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

रसः पञ्चवक्त्रः समुद्दिष्ट एव
प्रसिद्धः क्षितावङ्कुशोहि ज्वरस्य ॥ ३८

अथ (१) सूचिकाभरणोरसः

खण्डीकृत्य विषं कृष्णं सार्कदुग्धेऽल्पभाण्डके
सकाञ्जिके सगरले पुनश्चुल्ल्यां विनिक्षिपेत् ॥३९
सप्ताहं ततउद्धृत्य श्लक्ष्णं संचूर्ण्य यत्नतः।
सूचिकाभरणो नाम रसो गुरुतमोऽद्भुतः ॥ ४०
संज्ञानाशे विचेष्टस्य वल्लः काञ्जिकपेषितः।
ब्रह्मरन्ध्रे प्रयोक्तव्यः (२) शाखास्वपि हिमोदये ॥४१

अथ मृतसञ्जीवनोरसः

रसं गन्धकं टङ्कणं वत्सनाभं
समं मर्दयेद्धूर्तबीजेन यामम्।
ततो वत्सनाभेन हेम्नोत्थबीज-
द्रवैर्भावयित्वा त्रिवारं त्रिवारम् ॥ ४२
त्रिकट्वम्भसा पञ्चवारं सुभाव्य-
स्ततः सूतराजो मृतप्राणदायी।
ज्वरे संनिपाते ज्वरे नूतने वा
कफाजीर्ण कोन्मादबाधिर्यबाधे। ४३
ददेत्पायसं दाधिकं तक्रमस्मै
प्रदेयं सिता वा रसालारसो वा

(१) अनेन प्राचीनकालेऽपि इञ्जैक्शन प्रकारोऽपि सुविदित एवासीदिति प्रतीयते।
(२) हृदति मान्द्ये संज्ञानाशे हस्तपादादिषु हिमोदये अतिशैत्यागमे गुञ्जैकमित एवरसो ब्रह्मरन्ध्रे प्रयोक्तव्यः यथाशरीरोष्मापुनरावर्तेत।

CC-0. Prof. Satya Vrat Shastri Collection, Delhi. Digitized by S3 Foundation USA

ततो मात्रया दापयेद्वल्लमेकं
रसैः शृङ्गवेरोद्भवैः साधु वैद्यः ॥ ४४

अपरो मृत्सञ्जीवनोरसः (आरोग्यकारी रसः)

रसेन गन्धं द्विगुणं विमर्द्य
रसप्रमाणानि भवन्त्यमूनि ।
शिलाऽनलव्योषविषाभ्रकाणि
भृंगो मृषा माक्षिक तण्डुलीया ॥ ४५ ॥
कुम्भी समुण्डी मृतताल्लकश्च
सपत्रशाकोऽथ मरालपादः ।
कङ्कुष्टकश्चेति दिनत्रयं तदा
चार्द्राम्बुना सर्वमथो विमर्द्य ॥ ४६ ॥
निवेश्य कूप्यां रसमत्रदेयो
जम्बीरनिर्गुण्डी (१) जयाभिधानाम् ।
नव प्रमाणानि रसात्पलानि ॥ ४७ ॥
चाङ्गेरिकायाः स्वरसः पलैकं
ततस्तु रुद्ध्वा सिकताख्ययन्त्रे ।
चतुर्दशाहानि पचेत्सुशीते
तद्भावयेदार्द्रजलेन सूतो
मृताख्यसञ्जीवन इत्यपूर्वः ॥ ४८ ॥

---

(१) 'जयन्तिकानाम्' इति पाठान्तरम् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वल्लोऽस्य सर्वाञ्जयति प्रयुक्तो
गदान्सदायं निजसुप्रभावात् ।
प्राणेशवत्सर्वमिह प्रयोज्य-
मयं त्रिदोषे सविशेषवीर्य्यः ॥ ४९ ॥

अथ सन्निपातभैरवनस्यम्

रसफलतिलपर्णीबीजसंयुक्तभूतं
कुशदलघटबीजत्वग्रजोर्धांशतुत्थम् ।
प्रधमन-विधिनैतद्दत्तमात्रं शिरोरुक्-
प्रलपन-कफतन्द्रा-सन्निपातं निहन्यात् ॥ ५०

अथ प्रधमनम्

घटबीजत्वचा नस्य मञ्जनं वारिणा सह ।
निद्रातन्द्रा भ्रमहरं कुर्य्यात्संज्ञाप्रबोधनम् ॥ ५१
घटत्वग्राठतुत्थानि चूर्णमङ्कोलजं दलम् ।
तिलपर्ण्युद्भवं बीजमेतत्प्रधमनं वरम् ॥ ५२
दत्तमात्रं संनिपातं निद्रातन्द्राशिरोरुजः ।
कफोल्वणं निहन्त्याशु प्रलापं श्वासमुद्धतम् ॥ ५३
अरण्य गोमयं शुष्कं दग्ध्वा भस्म प्रकल्पयेत् ।
तत्पुटेदर्कं दुग्धेन शुष्कं वारत्रयेण च ॥ ५४
छिक्किकामेतदर्धं तु कट्फलं छिक्किकार्धकम् ।
मरिचं छिक्किकातुल्यं वस्त्रपूतं प्रकल्पयेत् ॥ ५५

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

नस्ये च रक्तिकामानं भक्षणेऽपि च तन्मतम् ।
कफवातभवां पीडां शिरोहृन्नासिकागताम्
अयं भस्मेश्वरोनाम नाशयेन्नाऽत्र संशयः ॥ ५६

अथ मोहान्धसूर्यः । सूतार्णवः

गन्धेशलशुनाम्भोभिर्मर्दयेद्यामपात्रकम् ।
तस्योदकेन संयुक्तं नस्यं दद्यात्तु बोधकृत् ।
मरिचेन समायुक्तं हन्ति तन्द्रामलापकान् ॥ ५७

अथ शीतारिः । (विषमज्वरारिः)

तालको दरदोद्भूतपारदो गन्धकः शिला ।
क्रमाद्भागार्धरहितं कारवेल्लयम्बुमर्दितम् ॥ ५८
इदमस्य प्रमाणेन ताम्रपात्रं प्रलेपयेत् ।
अधोमुखेदृढे भाण्डे तां निरुध्याथ पूरयेत् ॥ ५९
चुल्ल्यां वालुकया घस्रमग्निं प्रज्वालयेद्दृढम् ।
शीतं संचूर्ण्य माषोऽस्य नागवल्लीदले स्थितः ॥६०
भक्षितो मरिचैः सार्धं समस्तान्विषमज्वरान् ।
दाहशीतादिकान्हन्ति पथ्यं शाल्योदनं पयः ॥६१

अथ शीतभञ्जीरसः

रस-रसक-दरद-गन्धक-शिलाल-
शिखितुत्थताप्यगैरिक शिलाः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

असितोन्मत्तरसेन त्रिदिनं
मर्द्यं त्रिगुञ्जमितका वटिका ॥ ६२ ॥
माषद्वय जीरयुता देया कोष्णोदकानुपानेन ।
शीतागमे विशेषादतिवान्तौ(१) क्षीरशर्करां दद्यात् ६३

अथाजीर्णम्

प्रकृत्या रसशेषाद्वा त्रिभिर्दोषैरपाकतः ।
भवन्ति षडजीर्णानि वैषम्यादशनस्य च ॥६४॥
शूलं विरेको वमनमाटोपोऽरतिविभ्रमौ ।
विषूचिकाया रूपाणि मरणान्तानि वेगतः ॥६५॥

अथ क्रव्यादरसः

पलं रसस्य द्विपलं बलेः स्या-
त्ताम्रायसी चार्धपलप्रमाणे ।
संचूर्ण्य सर्वं द्रुतमग्नियोगा-
दैरण्डपत्रेषु निवेशनीयम् ॥ ६६ ॥
(२) पिष्ट्वाऽथ तां पर्पटिकां निदध्या-
ल्लोहे सुपात्रे वरपूतमस्मिन् ।
जम्बीरजं पक्करसं पलानि
शतं तलेऽस्याग्निमथाल्पमात्रम् ॥ ६७ ॥

(१) शर्करोपेतमुष्णं क्षीरमित्यर्थः (२) 'पिष्ट्वा तथा पर्पटिकां विधाय लोहस्य पात्रे वरपूतमस्मिन्' इति पाठान्तरम् ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

जीर्णे रसे भावितमेतदेतैः
सपञ्चकोलोद्भव वारिपूरैः ।
सवेतसाम्लैः शतमत्र योज्यं
समं रजष्टङ्कणजं सुभृष्टम् ॥ ६८ ॥
विडं तदर्धं मरिचं समं च
सत्सप्तधार्द्रं चणकाम्लवारा ।
क्रव्यादनामा भवति प्रसिद्धो
रसः सुमन्थानकभैरवोक्तः ॥ ६९ ॥
माषद्वयं सैन्धव तक्रपीत-
मेतस्य धन्यैः खलु भोजनान्ते ।
गुरूणि मांसानि पयांसि पिष्टी-
कृतानि खाद्यानि फलानि वेगात् ॥ ७० ॥
मात्रातिरिक्तान्यपि सेवितानि
यामद्वयाज्जारयति प्रसिद्धः ।
निहन्त्यजीर्णान्यपि षट् प्रवृद्ध-
मग्निं करोति क्रमसेवनेन ॥ ७१ ॥

अथ ज्वालानलः

क्षारत्रयं सूतगन्धौ पञ्चकोलमिदं समम् ।
सर्वैस्तुल्या जया भृष्टा तदर्धा शिग्रुजा जटा ॥७२॥
एतत्सर्वं जयाशिग्रुवन्हिमार्कवजैर्द्रवैः ।
भावयेत्त्रिदिनं घर्मे ततो लघुपुटे क्षिपेत् ॥ ७३ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सप्तधाऽऽर्द्रद्रवैर्घृष्टो रसो ज्वालानलो भवेत्।
निष्कोऽस्य मधुना लीढोऽनुपानं गुडनागरम् ॥७४॥
हन्त्यजीर्णमतीसारं ग्रहणीमग्निमान्द्यताम्।
श्लेष्महृल्लासवमनमालस्यमरुचिं जवात् ॥ ७५ ॥
सक्षौद्रं मागधी ताम्रं निष्कार्धं प्रत्यहं भजेत्।
अजीर्णपाण्डुशूलानि तेन नश्यन्त्यसंशयम् ॥ ७६
व्योषं करञ्जबीजानि मातुलुङ्गी जयानिशे।
काञ्जिकेनाञ्जनं हन्ति विषूचीं विषमामपि ॥ ७७
रोगेभसिंहः श्रीकण्ठगुटिका वापि हिंगुना।
योज्या सर्वेष्वजीर्णेषु विशेषात्कफवातजे ॥ ७८

अथ आमवातचिकित्सा

अविपक्वोऽग्निमान्द्येन यो रसः स निगद्यते।
रोगाणां प्रथमो हेतुः सर्वेषामामसंज्ञया ॥ ७९
तस्मिन्प्रवृद्धे कटिरुक् श्वयथुः पावकाल्पता।
ग्रहणीमेहपाण्ड्वार्त्तिजठराणि भवन्ति हि ॥ ८०

अथ आमवातारिः

रसो गन्धो वरावन्हिर्गुग्गुलुः क्रमवर्धितः।
एतदैरण्डतैलेन श्लक्ष्णं चूर्णं विमर्दयेत् ॥ ८१

(१) 'निष्कः' = माषचतुष्टयम्। 'चतुर्भिर्माषकैः शाणः स निष्कोऽष्टकमेव च' इति परिभाषोक्तेः ॥ इयं मात्रा अतिप्राचीनकाले व्यवह्रियमाणा आभाति, साम्प्रतिकानां कृते रक्तिकाष्टमांशादारभ्य रक्तिकान्ता मात्रा प्रयुज्यते, असामर्थ्यात्। 'मागधी' = पिप्पली। अस्या माषमेकम्।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कर्षोस्यैरण्डतैलेन हन्त्युष्णजलपायिनः ।
आमवातमतीवोग्रं दुग्धमुद्गादि वर्जयेत् ॥ ८२

अथ विद्रधिः

वस्तौ नाभ्यां गुदे कुक्षौ प्लीहक्लोमयकृत्सु च ।
(१) नाकुवद्बहिरन्तर्या श्वयथुर्विद्रधिःस्मृतः ॥ ८३
द्विवल्लः श्वयथुंहन्ति लोकनाथस्तु विद्रधिम् ।
अथवा (२) बोलसहितो द्विवल्लः पर्पटीरसः ॥ ८४
हिंगु कासीस (३) सिन्धूत्थं शिलाजतुविमिश्रितः ।
वारुणत्वग्भवः क्वाथो हन्याद् विद्रधिमुन्नतम् ॥ ८५

अथ वृद्धिः

क्रुद्धो नीचगतो वायुः शूलशोथकरः चरन् ।
वङ्क्षणान्मुष्कमालम्ब्य तच्छिराभिः करोति सः ८६
वृद्धिं मूत्रान्त्रमेदोभिस्त्रिभिर्दोषैः सशोणितैः ।
सप्तधैवमसाध्यः स्यादयं यत्नविपर्य्ययात् ॥ ८७
एरण्डतैलसहितो वातारिर्वृद्धिनाशनः ।
तत्तैलभृष्ट पथ्यान्तं चूर्णयुग्वा ससैंधवः ॥ ८८

(१) नाकुर्वल्मीकमृत्तिका तद्वद् गोलाकृतिः ।

(२) 'बोलम् = तन्नामकसारजद्रव्यम् 'हीराबोल' इति प्रसिद्धम् । myrrh,) इति आङ्ग्लभाषायाम् ।

(३) 'कौशिकसिन्धूत्थम्' इति पाठान्तरम् । 'कौशिकः' गुग्गुलुः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सप्ताहमिश्रं सिन्धूत्थसहितं हन्ति गोघृतम् ।
शम्बूकेषु स्थितं वृद्धिं घोरं सप्तविधं क्रमात् ॥ ८९
पातालयन्त्रयोगेन तैलं वृश्चिकसंभवम् ।
प्रलेपान्नाशयत्येव वृद्धिं मासान्न संशयः ॥ ९०

अथ पातालयन्त्रम्

जले सच्छिद्रपात्रे गजसमचतुरश्रेणि खाते स्थापयेत्तत्र सूक्ष्मा पालिकया मुद्रयाभाण्डाधः सुषिरलग्नाल्पभाण्डतन्मध्यस्थ श्वभ्रान्तरस्तत्रोपरि गर्ते वन्यकरीषपीलौ पाकः पूरितैः अधोभाण्डे सुषिरेण तैलपातः । इतियन्त्रम् ।(१)

अथ श्लीपदम्

श्लीपदे कठिनः शोथः पादयोः करयोः क्वचित् ।
जायते कफवाताभ्यामानूपद्रवभोजिनाम् ॥ ९१
लंघनस्वेदवमनैः रेचनै रक्तमोक्षणैः ।
शोधयेच्छ्लीपदं श्लेष्महरैर्वातहरैरपि ॥ ९२

---

(१) भाण्डस्य तलतो रन्ध्रं संविधाय सुवर्त्तुलम् ।
तदधो मृण्मयं वापि दार्षदं काचनिर्मितम् ॥
धृत्वा पात्रन्तु तद्भाण्डं भेषजैः परिपूरयेत् ।
समाच्छाद्य ततो भाण्डं संलिप्य च मृदादिभिः ॥
भूगर्त्ते तत्समाधाय चोर्ध्वमाकीर्य वन्हिभिः ।
रसं विस्रावयेदेतद्यन्त्रं पातालनामकम् ॥
एवन्तु सम्यक्त्वं प्रपद्ये ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कणावचादारु पुनर्नवानांचूर्णं साविश्वं सम वृद्धदारु ।
अनेन सूतस्य निहन्ति वल्लः सकाञ्जिकः श्लीपदरोगमुग्रम्॥९३

अथ मूत्राघातः

वराम्बु (१) लवणोपेतं ससूतं यः पिबेन्नरः ।
तस्य नश्यन्ति वेगेन मूत्राघातास्त्रयो दश ॥ ९४
तिल (२) बिल्वपटोलानां क्षारं नीरेण यः पिबेत् ।
मदिरां वा प्रयुञ्जीत त्वगेलोषणसंयुताम् ॥ ९५

अथ व्रणः

दुष्टाः दोषाः क्रमाद्धातून्संदूष्याङ्गेषु कुर्वते ।
शोथपूर्वान्व्रणान्नाना नाडीभेदैः सयातनान् ॥ ९६
जलौकालाबुशृङ्गाद्यैः कृत्वाऽसृङ्मोक्षणं ततः ।
औषधादिविधिः कार्यः तदा रसपुरः सरः ॥ ९७
पलं कृष्णा पुरात्पञ्च त्रिफला (३) त्रिपला भवेत् ।
सूतभस्म पलं चास्य कर्षः सर्वव्रणापहः ॥ ९८
रोगेभसिंहो वेल्लादिर्गुग्गुलुश्चात्र शस्यते ।
सताम्रा वा सलोहा वा पर्पटी व्रणरोगिणाम् ॥९९
क्षालनं (४) त्रिफला नीरैर्निम्बपत्रप्रलेपनम् ।
रोपणं घृतसक्तुभ्यामशेषेषु व्रणेषु च ॥ १००

(१) 'लवण' मत्र सैन्धवं ग्राह्यम् ।
(२) 'निम्बपटोलानाम्' इति पाठान्तरम् ।
(३) 'पञ्चपला भवेत्' इति पाठान्तरं साधु मन्ये ।
(४) 'त्रिफला क्वाथै' रिति ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

व्यवायो जनसम्पर्को दिवानिद्राऽतिसाहसम्।
पिष्टान्नं मर्दनं चैव व्रणरोगेषु गर्हितम् ॥१०१

अथ मेदः

अव्यायामदिवास्वप्नमधुरान्ननिषेवणात्।
मेदो विवर्धते प्रायस्तेनाल्पः सर्वकर्मसु ॥ १०२
क्षुद्रश्वासतृषायुक्तः स्थूलास्फिगुदरस्तनः।
(१) प्रस्विन्नो मूढवद्धान्तलोचनो मेदुरो भवेत् ॥१०३

अथ वडवाग्निरसः

सूतः सतारः सरविः सताळः
सूर्य्याम्बुघृष्टोऽस्य च वल्ल एकः।
क्षौद्रेण हन्त्युद्धतमेदुरत्वं
मध्वम्बु तस्यानुपिबेत्त्रिवारम्। (२)
पञ्च कर्माणि कृत्वादौ रुक्षान्नैः कटुतिक्तकैः।
प्रमितैरुपवासाद्यैः प्रायो मेदः प्रहीयते ॥१०४

---

(१) 'प्रस्वेदी' इति पाठान्तरम् ॥

(२) 'त्रिमासम्' पाठान्तरम्। इदन्तु बोध्यम्—
'त्रिमास' मिति पाठे तु प्रत्यहं वारत्रयमेव ग्राह्यम्। 'त्रिवार' मिति पाठेऽपि प्रतिदिनं वारत्रयं गृह्णन् न्यूनातिन्यूनमासत्रयपरिमितकालपर्यन्तं सेवेत इत्यपि न विस्मरणीयम्। परन्तु रोगशान्त्यवधिपर्यन्तमेवमेव सेव्यम्, वस्तुतो न मासत्रयावधिर्नियतः। अपिच—वारमेकं रिक्तकोष्टे प्रातः, वारद्वयञ्च सायंप्रातर्भोजनोत्तरम् अनया रीत्या वारत्रयसेवनं प्रायशिकं ज्ञेयम् ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अथ विसर्पः

(१) पादयोः कुरुते पित्तं रक्तं संदूष्य कोपतः ।
विसर्पमिति तं विद्यादन्तकं यमसंनिभम् ॥१०५
जलौकापातनं तत्र चातुर्जाताम्बु सेवनम् ।
पुटभृष्टपटुःप्रोक्तः प्रलेपो नवतीतयुक् ॥ १०६
वक्ष्यते पित्तशान्त्यर्थं यो विधि रसपूर्वकः ।
स हितोऽन्येषु कुष्ठेषु प्रकारैर्यश्च सूचितः ॥ १०७

अथ कुष्ठम्

त्वङ्मांसासृग्वसा दोषा दूषयित्वा प्रकुर्वते ।
कुष्ठान्यष्टादशाङ्गेषु पापिनामहिताशिनाम् ॥ १०८
कण्डूकोष्ठव्रणादीनामकस्मात्संभवस्त्वचि ।
त्वापोविवर्णता कार्श्यं कुष्ठानां पूर्वलक्षणम् ॥ १०९
श्वेतोदुम्बरगुञ्जाभं विशीर्णाङ्गुलिनासिकम् ।
कपालाभं च सन्त्यन्यान्येवमादीनि देहिनाम् ॥११०
पक्षात्पक्षाच्छर्दनं सप्तरात्रा-
न्नस्यं षष्ठे मास्यसृङ् मोक्षणं च ।
मासान्मासात्स्रंसनं सर्वकालं
वासोऽरण्ये कुष्ठिनां सूरिदृष्टः ॥ १११
पञ्चकर्मविरोधेन यः कुष्ठे कुरुते क्रियाम् ।
उपहासं स लभते न सिद्धिं भ्रान्तमानसः ॥ ११२

---

(१) पादयोरिति उपलक्षण मेतदन्यावयवानामपि, किन्तु अत्र द्रागेव विषविसर्पणात् 'पादयो' रिति विशिष्योक्तम् ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अथ वज्रेशरसः

रसो भस्मीभूतः कुलिशकनकाभ्राणि च समाः
समस्तैः सत्तालः कनकजलशिग्रुप्रमृदितः।
ततोऽर्कः स्नुक्क्षीरैस्तदनु शशिरानीफलभवैः
सुनैलैर्वज्रेशो भवति बहुकुष्ठप्रदलनः॥ ११३

प्रयुञ्ज्यादावल्गु प्रभवमुशलीश्यामलगल-
स्फुटन्निर्गुंडीभिः सह रसपरं मापतुलितम्।
पिबेत्क्षौद्रं सर्पिस्तदनु मधुरं भोजनमिह
प्रशस्तं न स्युस्तान्यथ सकलकुष्ठानि तरसा॥११४

अथ गलत्कुष्ठारिः

रसो बलिस्ताम्रमयः पुरोग्नि-
शिलाजतु स्याद्विषतिन्दुकश्च।
वरा च तुल्यं गगनं करञ्ज-
बीजं पृथग्भागचतुष्टयं च॥ ११५

संमर्द्य सर्वं मधुना घृतेन
घृतस्य पात्रे निहितं प्रयत्नात्।
कैष भजेत्प्रत्यहमत्र पथ्यं
शाल्योदनं दुग्धमधूत्तमं च॥ ११६

विशीर्णकर्णांगुलि नासिकोऽपि, भवेदनेन स्मरतुल्यमूर्तिः।
योषित्परित्याग इह प्रदिष्टो(१) जलौदनं वापि निबद्धमूलम्११७

---

(१) लवणमरीचादिकं सर्वमन्यद्धेयमित्यर्थः। 'निबद्धमूलम्'=सुपथ्यं हितमिति यावत्

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अथ तालकेश्वरः

सूतताप्याशिलातालं टङ्कणः सिन्धुसंयुतः।
गन्धार्कौ द्विगुणौ सूताज्जम्बीराद्भिर्विमर्दयेत् ॥ ११८
षडहं पुटितं षड्वा भूधरे सकलं त्विदम्।
षट्पलं द्विपलं ताम्रं लोहभस्म चतुः पलम् ॥ ११९
जम्बीराद्भिर्दिनं घृष्टं त्रिंशदंशं विषं क्षिपेत्।
अस्य माषद्वयं खादेन्महिषीघृतसंयुतम् ॥ १२०
मध्वाज्यैर्वाकुचीबीजं कर्षमात्रं लिहेदनु।
तालकेश्वरनामाऽयं सर्वकुष्ठहरो रसः ॥ १२१
बीजमावल्गुजं हन्ति (१) सगुडं मलयूयुतम्।
बिभीतककाथयुतं पुण्डरीकं सुदुस्तरम् ॥ १२२

अथ श्वित्रप्रतीकारः

अथ श्वित्रे प्रतीकारः कथ्यते तद्विनाशकृत्।
कुचिला जयपालानि कुर्य्याच्चन्दनकं द्वयम् ॥ १२३
तेन श्वित्रशरीरस्य लेपनं परमौषधम्।
स्फोटा देहे पतन्त्येव दिनमध्येऽस्य रोगिणः ॥ १२४
अथ लाङ्गलिकाकन्दं लेपयेत् श्वित्रमण्डलम्।
तेन तद्दिवसादूर्ध्वं विस्फोटाः प्रपतन्ति च ॥ १२५
मध्ये च सेवते मासं मरिचेन समं विषम्।
रक्तिकामानकं नूनमवश्यं श्वित्रनाशनम् ॥ १२६

---

(१) 'सघृतम्' इति पाठान्तरम्। 'मलयू' वाकुची।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अथ श्वेतारिरसः

शुद्धसूतं विषं गन्धं त्रिफलाभृंगवाकुची।
भल्लातकं तिलं कृष्णं निम्बबीजं समांशकम् ॥ १२७
मर्दयेद्भृंगजद्रावैः शोष्यं पेष्यं पुनः पुनः।
इत्थं कुर्य्यात् त्रिसप्ताहं रसः श्वेतारिको भवेत्।
मध्वाज्यैर्निष्कमात्रं तु खादेत् श्वित्र प्रणाशनं ॥ १२८

इति श्रीरत्नदेवसुत श्रीरामराज विरचिते रसरत्नप्रदीपे ज्वरादि-
कुष्ठान्तानां चिकित्सानिरूपणोनाम
चतुर्थोऽधिकारः ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अथ पञ्चमोऽधिकारः ।

अथ गलगण्डः

अवामे वाऽथवा वामे निबद्धः श्वयथुर्गले ।
मुष्कवल्लम्बते यस्तु गलगण्डं तमादिशेत् ॥ १
तस्य माला थ परितः पूयस्रावादिलक्षणा ।
गण्डमालेति तामाहुरपक्वे गलगण्डकम् ॥ २
स काञ्चनारः सवरः सोपकुल्यः पुरो जयेत् ।
गण्डं रसयुतो मालां रक्तमोक्षपुरः सरः ॥ ३
सिन्धूग्रक्षारवेल्लाग्निं रास्ना व्योषैः सदारुभिः ।
कटु तैलं पचेत्तिक्त तुम्बीफलरसैः शुभैः ॥ ४
नस्ययोगान्निहन्त्येव (१) गण्डमालां सुदारुणाम् ।
कटुतिक्तकषायादि पथ्यं शस्तं वराघृतम् ॥ ५
लाङ्गलीकल्कितैलं तु निर्गुण्डीसलिले शृतम् ।
निहन्ति नस्यलेपाभ्यां गण्डमालां सुदारुणाम् ॥ ६

अथाम्लपित्तम्

अम्लः सतिक्तो वमथुः कण्ठधूमायनं सदा ।
अरोचकाग्निमान्द्यादि लक्षणान्यम्लपित्तिनाम् ॥ ७
वमनै रेचनैस्तिक्त भूयिष्ठाहारसेवनैः ।
अन्यैरनशनैर्धीमानम्लपित्तमुपाचरेत् ॥ ८

---

(१) 'गलगण्डं सुदारुणम्' इति पाठान्तरम् ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अथ लीलाविलासो रसः

रसोवलिर्व्योम रविः सुलोहं
धात्र्यक्षनीरैस्त्रिदिनं विमर्द्य ।
तदल्पभृष्टं मृदुमार्कवेण
संमर्दयेदस्य च वल्लयुग्मम् ॥ ९
हन्त्यम्लपित्तं मधुना विलीढं
लीलाविलासो रसराज एषः ।
दुग्धं सकूष्माण्डरसं सुधात्री
पक्वं शनैस्तत्स (१) सितं भजेद्वा ॥ १०

अथापरो लीलाविलासोरसः

शुद्धसूतं विषं गन्धं मृतताम्राभ्रलोहकम् ।
तुल्यं सम्मर्दयेद्यामं यामं लघुपुटे पचेत् ॥ ११
अक्षधात्रीहरीतक्यौ क्रमवृद्ध्या विपाचयेत् ।
जलेनाष्टागुणेनैव ग्राह्यमष्टावशेषितम् ॥ १२
अनेन भावयेत्पूर्वं पूर्वसूतं पुनः पुनः ।
पंचविंशति वारांश्च तावता भृंगजैर्द्रवैः ॥ १३
शुष्कं संचूर्णितं खादेत्पञ्चगुञ्जा मधुप्लुतम् ।
रसो लीलाविलासोऽयमम्लपित्तं नियच्छति ॥ १४
कूष्माण्डस्य रसो ग्राह्यः पलानां शतमात्रकम् ।
रसतुल्यं गवां क्षीरं धात्रीचूर्णं पलाष्टकम् ॥ १५

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(१) 'सलिलं' 'समितं' वेति पाठान्तरम्

लघ्वग्निना पचेत्तावद्यावद्भवति पिंडितम् ।
धात्रीतुल्या सिता योज्या पलार्धं लेहयेदनु ।
खण्डकूष्माण्डकाख्यातमस्य नाम विदुर्बुधाः ॥ १६
सूततामं च गुञ्जैकं मधुना सह लेहयेत् ।
द्राक्षां पथ्यासमां खादेदनु स्यादम्लपित्तजित् ॥ १७
मृतसूतार्क लोहानां तुल्यां पथ्यां विचूर्णयेत् ।
माषमात्रं लिहेत्क्षौद्रैरम्लपित्तप्रशान्तये ॥ १८
पटोल कटुकी शुण्ठी सिताक्षौद्रैर्लिहेदनु ।
मृतं सूतं मृतं लोहं क्षौद्रैर्लेह्यं द्विगुञ्जकम् ॥ १९
पलत्रयं पटोलं च तिक्ताक्काथं सितायुतम् ।
अम्लपित्तहरं चानु पिबेच्छर्दिरुजापहम् ॥२०

अथ शीतपित्तचिकित्सा

कोठानां श्यावरक्तानां पिटकानां समुद्भवः ।
दृश्यते यत्र सहसा शीते तच्छीतपित्तकम् ॥ २१
यवानीगुडसंमिश्रो भस्मसूतो द्विवल्लकः ।
शीतपित्तं निहन्त्याशु कटुतैलेन मर्दनम् ॥ २२
निशाषष्टिक दूर्वाणां पिष्ट्वा तक्रेन कारयेत् ।
उद्वर्तनं शीतपित्ते गोशकृद्भस्मनस्तनौ ॥ २३

अथ विस्फोटचिकित्सा

अकाण्डे पित्तबाहुल्याद्रक्ताः श्वेताः सितेतराः ।
भवन्ति देहिनां प्राणहरा विस्फोटकाः स्मृताः ॥ २४

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(१) ससुगन्धि सकर्पूरं भस्मसूतं प्रयोजयेत् ।
विस्फोटकेषु शीतेन (२)काञ्जिकेनाथ सेचनम् ॥ २५
अतिप्रवृद्धेष्वेतेषु समस्ता व्रणवत् क्रियाः ।
विस्फोटकेषु सुतरां विधिर्योज्यः सुशीतलः ॥ २६

अथ नेत्ररोगचिकित्सा

गण्डूषाञ्जननस्यादि हीनानां कफकोपतः ।
षट् सप्ततिर्नेत्ररोगा दुःसहाः स्युरुपेक्षिताः ॥ २७

अथ रसादिवर्तिः

रसटङ्कणसिन्धूत्थव्योषखर्परतुत्थकैः ।
सवेतसाम्लैः सक्षौद्रैर्वर्तिं नेत्रगदापहा ॥ २८

अथ रसशलाका

सघृतं त्रिफलाचूर्णं निशि सेव्यं प्रगे पुनः ।
नेत्रप्रक्षालनं नीरैर्वैरोत्थैर्नित्यमाचरेत् ॥ २९

---

(१) 'सुगन्धिः' = बर्बरचन्दनं रक्तचन्दनविशेषः ।

(२) 'काञ्जिकं' = स्वनामख्यातधान्याम्ले । तस्य प्रकारो यथा -

तुलामितं षष्टिकतन्दुलस्य
प्रगृह्य चान्नं विधिवद्विधाय ।
द्रोणेऽम्भसि क्षिप्तमथ त्रियामं
तत्सप्त रात्रं पिहितं प्रयत्नात्
तत्रैव कल्कं सकलं निरस्येत्
तत्काञ्जिकं कथ्यत आरनालम् ॥ इति ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

हेमतारार्कसृष्टा वा शलाका रसचर्चिता ।
शीतसंघर्षणं कुर्य्यात्तया निर्मलदृग्भवेत् ॥ ३०

अथ स्वर्णादिगुटिका

स्वर्णरूप्यार्कमुक्ताश्च वार्धिफेनवरामृताः ।
शंखव्योषनिशातुत्थप्रवालं मधुयष्टिका ॥ ३१
सर्वं (१) क्लीतनकाम्भोभिः पिष्टं च वटिकां हरेत् ।
अशेषान्नयनातङ्कान् वेगतस्तुदुपद्रवान् ॥ ३२

अथ मुखरोगचिकित्सा

सरक्तः कुपितः श्लेष्मा करोत्यास्ये गदान् बहून् ।
दौर्गन्ध्यं पिडकापाकोपजिह्वादीन् समासतः ॥ ३३
सर्वस्यामयजिद्भुक्तो मधुना पर्पटीरसः ।
चर्वयेद्वा (२) महाराष्ट्रीं गण्डूषान् वा वराजलैः ॥ ३४
केशरं मातुलुङ्गस्य सैन्धवक्षौद्रसर्पिषा ।
तालुशोषे प्रदातव्यं तृष्णायां च विशेषतः ॥ ३५
पथ्या (३) बालककुष्ठानि गोमूत्रैः साधितानि च ।
(४) एतस्य वटिका हन्ति मुखदौर्गन्ध्यसन्ततिम् ॥ ३६
उपजिह्वां कुठारेण छित्वा क्षारं प्रयोजयेत् ।
दहेद्वा शनकैर्मूले याति निःशेषतां शनैः ॥ ३७

---

(१) 'क्लीतनकम्' = मधुयष्टिः एतद्विषये—'मधुरं रुच्यं वल्यं वृष्यं व्रणघ्नं शीतलं गुरु । चक्षुष्यं रक्तपित्तघ्नम्' इत्युक्तम् । 'वटिकाम्' = वर्त्तिम् ।

(२) 'महाराष्ट्रीम्' = जलपिप्पलीम् । अस्या गुणा यथा—'कटुः, तीक्ष्णा, कषाया, मुखशोधिनी, व्रणकंटादिदोषघ्नी रसदोषघ्नी च' इति ॥

(३) 'बालकम्' = हीवेरम् । 'सुगन्धवाला' इति भाषायाम् । (४) 'एतस्य' = योगस्येत्यर्थः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अथ कर्णरोगचिकित्सा

करोति विगुणो वायुर्मलं संगृह्य कर्णयोः ।
सकफः पाक बाधिर्यशूलस्रावादिकान्गदान् ॥ ३८
सस्तन्यष्ठङ्कणो भृष्टः कर्णशूलं क्षणाज्जयेत् ।
आर्द्रकस्वरसः कोष्णः सैन्धवेन युतोऽथवा ॥ ३९
सैन्धवं वस्तमूत्रं च कर्णस्रावं नियच्छति ।
(१)ज्वालामुखी कल्कसिद्धं तैलं वा स्रावशूलजित् ॥४०
चर्वणोऽथ द्रवापूर्णो नंद्यावर्तपलाशयोः ।
याति गोमक्षिका कर्णाद्दष्टा बहुपदी जवात् ॥ ४१
साधितं क्वाथकल्काभ्यां दशमूल्यास्तिलोद्भवम् ।
हन्ति बाधिर्य्यमभ्यङ्ग नस्यसम्भरणादिभिः ॥ ४२

अथ नासारोगचिकित्सा

अर्शांसि पीनसं स्रावः क्वचिच्छोणितपूययोः ।
रोगा नासोद्भवास्तेषां क्षयो नस्यादिभिर्भवेत् ॥४३
(२)एरण्डस्तगरं रास्ना शताह्वा मधुयष्टिका ।
जीवन्ती शृंगविश्वाख्ये सैन्धवं कृमिजित्समम् ॥४४
एतत्तैलं पचेद्भृङ्गरसेन पयसा सह ।
न स्युर्नासागदा नस्यादाकण्ठादुपरि स्थिताः ॥४५
अजाजीघृतखण्डाभ्यां नस्यात्स्रावं नियच्छति ।
नासार्शसां प्रशान्त्यर्थं जलौकाभिर्हरेदसृक् ॥ ४६
घृतेन पीनसं हन्ति कुङ्कुमं नस्ययोगतः ।
हिङ्गुनस्यं जयेद्वेगात्कामलां तण्डुलाम्बुना ॥ ४७

---

(१) 'ज्वालामुखी'=अग्निशिखा । 'कलिहारी' इति भाषा ।

(२) 'जन्तूर्वगता' इत्यर्थः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अथ शिरोरोगाः

प्रपौण्डरीकं मधुकं कणां च नीलोत्पलं चन्दनमेभिरेव च।
तैलं घृतं धात्रिरसेन हन्या-च्छिरो विकारान्पलितैः समेतान् ॥ ४८

अथ प्रदरः

दुष्टैर्दोषैः पृथक्सर्वैर्नानावर्णं स्रवेदसृक् ।
योनितः प्रदरं ज्ञेयं यदकालेऽतिदुस्तरम् ॥ ४९
रसाञ्जनवृषादार्वीविषाब्दारुष्करैः कृतः ।
सकिरातैर्हरेत्क्वाथः प्रदराणि मधुप्लुतः ॥ ५०
वासाकषायसहितं रसभस्म प्रयोजितम् ।
प्रदरं हन्ति वेगेन बलाक्षौद्रपयोन्वितम् ॥ ५१
रक्तपित्तहरः सर्वः प्रदरे नूतने विधिः ।
रक्तातीसारकथितं सर्वमत्र प्रयोजयेत् ॥ ५२
रसभस्म विना यत्र कथ्यते संहिताक्रमः ।
अनुक्तमपि तज्ज्ञेयं तत्र तद्रोगशान्तये ॥ ५३

अथ योनिदोषचिकित्सा

समग्रं वातजित् कर्म योनिव्यापत्सु योजयेत् ।
क्षालन स्वेदलेपांश्च वरानीरेण कारयेत् ॥ ५४

अथ क्लैब्यवाजीकरणे

अति प्रसंगान्मृगलोचनानां
त्यागाद्युवापि (१) ध्वजपातमुग्रम् ।
प्राप्नोति तीक्ष्णैर्लवणाम्लभोज्यैः
शुक्रक्षयाद्विस्मरणाच्च घातात् ॥ ५५

(१) 'ध्वजपातम्'=पुंस्त्वभ्रंशम् ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अथ पञ्चशरोरसः

रसेन सच्छाल्मलिजेन सूतं
त्रिःसप्तरात्रं सबलिं विमर्द्य ।
कृता तयोः कज्जलिका विपक्वा
घृते रसः पञ्चशरोऽयमुक्तः ॥ ५६
वल्लोऽहिवल्लीदलसंप्रयुक्तो
वीर्य्यातिवृद्धिं कुरुतेऽस्य नूनम् ।
माषान्नमद्याद्गुरु पायसं च
पयः पिबेन्माहिषमग्निसिद्धम् ॥ ५७

अथ मदनोरसः

शुद्धं रसं खाखस वल्कतोये
घृष्टं समुत्थाप्य यथा त्रिवारम् ।
समेन गन्धेन तु भस्म कृत्वा
संयोजयेत्तत्किल सूतकेऽस्मिन् ॥ ५८
सूताभ्रगन्धाहिशिलागरुत्म
लवङ्गवङ्गाः सहजातिजातैः ।
बृहद्धात्रिकापत्रयुतैः समांशै-
र्द्वात्रिंशभागेन विषेण युक्तैः ॥ ५९
सम्भावितैः खाखसवल्कवार्भि-
स्त्रिःसप्तवारं मदनो रसः स्यात् ।
गुञ्जाद्वयं शर्करयाऽस्य भुक्तं
वीर्य्यातिवृद्धिं दृढतां च किञ्चे ॥ ६०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(१) करोति पुंसां सहसा समर्थः
क्षयाग्निमान्द्यग्रहणीर्जयेच्च ।
पिबेत्पयः खाखसवल्कसिद्ध-
मस्यानु योज्यं मधुरं सदुग्धम् ॥ ६१

अथ चन्द्रोदयरसः

पलं मृदु स्वर्णदलं रसेन्द्र पलाष्टकं षोडश गन्धकस्य ।
शोणैः सुकार्पासभवैः प्रसूनैः सर्वं विमर्द्याऽथ कुमारिकाद्भिः ॥६२
तत्काचकुम्भे निहितं सुगाढे मृत्कर्पटैस्तद्दिवसत्रयं च ।
पचेत्क्रमाग्नौ (२) सिकताख्ययन्त्रे ततो रसः पल्लवरागरम्यः ॥६३
निगृह्य चैतस्य पलं पलानि चत्वारि (३) कर्पूररजस्तथैव ।
जातीफलं सोषणमिन्द्रपुष्पं कस्तूरिकाया इह शाण एकः ॥ ६४

---

(१) 'करोति मासात्सहसा समर्थं' इति पाठान्तरम् ।
तेन मासपर्यन्तमस्य सेवनमत्यावश्यकं भाति ॥

(२) 'वालुकायन्त्रे' इत्यर्थः । (३) 'कर्पूररजः' इति भीमसेनीकर्पूर एव ग्राह्यः । तस्य प्रकारो यथा योगरत्नाकरे :—

सुधांशोर्वसुभागाः स्युरेलाभागद्वयं तथा ।
चन्दनं चाब्धिफेनं च बीजं कतकसंभवम् ।
रसाञ्जनं भद्रमुस्तं प्रत्येकं कर्षसंमितम् ।
सर्वं दुग्धे विमर्द्याथ पिण्डं गोधूमपिष्टवत् ।
कृत्वा पात्रे निधायाथ क्षिपेत्पात्रं तदोपरि ।
अधः प्रज्वालयेद्दीपं वर्त्याऽगुष्ठ समानया ।
एवं प्रहरपर्यन्तं वन्हिं कुर्य्याच्च युक्तितः ।
पात्रस्योपरि भाण्डं तु शीतलं रक्षयेद्बुधः ।
सदार्द्रचैलखण्डेन शीतलेन च वारिणा ।
स्वाङ्गशीतं ततो ज्ञात्वा पश्चात्कर्पूरमाहरेत् ।
स्फटिकाकारमत्यच्छं श्वेतं हीरमणि प्रभम् ।
भीमसेनास्य कर्पूरमौषधेषु प्रयोजयेत् ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

चन्द्रोदयोऽयं कथितोऽस्य माषो भुक्तोऽहिवल्लीदलमध्यवर्ती।
मदोन्मदानां प्रमदाशतानां गर्वाधिकत्वं ग्लपयत्यकाण्डे ॥ ६५
शृतं घनीभूतमतीवदुग्धं मृदूनि मांसानि समण्डकानि।
नवान्नमिष्टानि भवन्ति पथ्यमानन्ददायीन्यपराणि चात्र ॥ ६६

वलीपलितनाशनस्तनुभृतां वयस्तम्भनः
समस्तगदखण्डनः प्रचुररोगपञ्चाननः।
गृहे न रसराडयं भवति यस्य चन्द्रोदयः
स पञ्चशरदर्पितो मृगदृशां कथं वल्लभः ॥ ६७

पलाशोदुम्बरफलैस्तिलतैलसमन्वितैः।
मधुना योनिमालिप्य गाढीकरणमुत्तमम् ॥ ६८

(१) माकन्दमूलसंयुक्त मधुकर्पूरलेपनात्।
गतेऽपि यौवने स्त्रीणां योनिर्गाढा प्रजायते ॥ ६९

मरिचं सैन्धवं कृष्णा तगरं बृहतीफलम्।
अपामार्गस्तिलाः कुष्ठं यवाः माषाश्च सर्षपाः ॥ ७०

अश्वगन्धा च तच्चूर्णं मधुना सह योजयेत्।
अस्य सन्ततलेपेन मर्दनाच्च प्रजायते ॥ ७१

लिङ्ग वृद्धिः स्तनोत्सेधः संहति भुजकर्णयोः।
सिताश्वगन्धा सिन्धूत्थछागक्षीरैर्घृतं पचेत् ॥ ७२

तल्लेपनान्मर्दनाल्लिङ्गवृद्धिः संजायते परा।
इन्द्रवारुणिकापत्ररसैः सूतं विमर्दयेत् ॥ ७३

रक्तस्य करवीरस्य काष्ठेन च मुहुर्मुहुः।
तल्लिप्तालिङ्गसंभोगाद्योनिद्रावः प्रजायते ॥ ७४

(१) 'माकन्दमूलम्' = आम्रमूलम्।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ताम्बूलपत्रचूर्णं तु चूर्णं कुष्ठशिवाभवम् ।
वारिणा लेपनं कुर्य्याद्गात्रदौर्गन्ध्यनाशनम् ॥७५
कुलित्थसक्तवः कुष्ठं मांसी चन्दनजं रजः ।
सक्तवश्चणकस्कन्धत्वक्चैवैकत्र कारयेत् ।
स्वेददौर्गन्ध्यनाशश्च जायतेऽस्यावधूलनात् ॥ ७६

अथ पूर्णेन्दुः

क्षारैश्च लवणे वन्हिराजिकाभ्यां च काञ्जिकं ।
दत्वा दत्वा दिनं सम्यक् पारदं मर्दयेत्ततः ॥ ७७
क्षालयेत्काञ्जिकैरेव मर्दयेत्कटुकैरपि ।
क्षालयेच्छ्लक्ष्णसंपिष्टराजिकाविषहिंगुजाम् ॥ ७८
मूषां कृत्वा तदन्तस्थं सूतं तां वस्त्रवेष्टिताम् ।
स्वेदयेत्काञ्जिके दोलायन्त्रे तां क्षालयेत्पुनः ॥ ७९
गुरुदृष्टेण मार्गेण शिवादिकृतपूजनः ।
अङ्घ्रिणा तारपत्राणां रसपिष्टिं विधाय च ॥ ८०
(१) मातुलोद्भवतैलेन मर्दनं सप्तवासरान् ।
दृढेन वाससा गोलं बध्वा संपीडयेद् दृढम् ॥८१
सप्तशः स्वेदयेद्रंभागर्भे स्वल्पेन वन्हिना ।
ततस्तां स्वेदयेदेतैः दोलायन्त्रे गतां शनैः ॥ ८२
गुडूचीदुग्ध शंबूकछागी रक्तैश्च गोक्षुरैः ।
रंभाफल वराहस्ती पिप्पली (२) कोकिलाक्षकैः ॥८३

(१) 'धत्तूरतैलेन' इत्यर्थः ।
(२) 'कोकिलाक्षकम्' = तालमखाणा इति प्रसिद्धम् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

धत्तूर पत्रमूलोत्थस्वरसैस्त्रिर्विमर्दयेत् ।
अहिफेनजयानीरैः क्वाथैरग्नि समुद्भवैः ॥ ८४
अपामार्गद्वयक्वाथैर्वाटयालकभवैरपि ।
गिरिकर्णैर्तिलदलैर्निर्गुण्डीकाकमाचिका ॥ ८५
राजिका छिक्किका गुञ्जा खुरासानी भवैरपि ।
(१) अरिवरी भृङ्गदिव्या जयन्ती मुनिवासकैः ॥८६
नागार्जुनी काशभेदा ब्राह्मी तुलसिका रसैः ।
दशमूलोद्भवैक्वाथैः तथा ज्योतिष्मतीभवैः ॥ ८७
अर्कपुष्पीशंखपुष्पी धातकीभार्ङ्गिजैरपि ।
वानरी शर्करा तालैः शोषणैर्जाति जातकैः ॥ ८८
चातुर्जातैर्जातिपत्रैराकारकरभैरपि ।
पुरन्दरभवैः पुष्पैः पूर्णेन्दुःस्याद्रसोत्तमः ॥ ८९
कार्य्या समज्जया सेव्यो वल्लोऽस्य सितया सह ।
यस्य सन्ति गृहे नित्यं पीनोन्नतपयोधराः ॥ ९०

---

(१) 'अरिः' = खदिरभेदः 'तिक्तखैर' इति प्रसिद्धम् । 'वरी' = शतावरी । 'भृङ्ग' भृङ्गराजः । 'दिव्या = ब्राह्मी 'जयन्ती' = अग्निमन्थः । 'मुनिः' = अगस्त्यवृक्षः । 'वासकम्' = वासा । 'नागार्जुनी' = दुग्धिका । 'काशः' = प्रसिद्धस्तृणविशेषः । 'भेदी' = अम्लवेतसः 'ज्योतिष्मती' = मालकंगणी इति प्रसिद्धम् । 'वानरी' = कौंच इति प्रसिद्धम् । 'शर्करा' = खण्डविकृतिः 'चीनी' इति ख्यातम् । 'तालम्' = तालमूली 'शोषणम्' = शुंठी । 'जातिः' = जातिफलम् । 'जातकम्' = चम्पेलीपुष्पम् । 'चातुर्जातम्' = त्वगेलापत्र केसरं समभागम् । तथाच—

'त्वगेलापत्रकैस्तुल्यैस्त्रिसुगन्धित्रिजातकम् ।
नागकेशरसंयुक्तं चातुर्जातकमुच्यते ॥ इति ।

'जातिपत्रम्' = जावित्रीति प्रसिद्धम् ।

'आकारकरभम्' = अकरकरा इति प्रसिद्धम् । 'पुरन्दरः' = चव्यम् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(१) श्वेता कोल्हजयावारा सूतो मद्यो दिनत्रयम् ।
पुटितश्चान्धमूषायां सम्यक् भस्मत्वमाप्नुयात् ॥९१
प्रत्यहं रक्तिकाः पंच भक्षयेन्मधुसर्पिषा ।
को वा तस्य गुणान्वक्तुं भुवि शक्तोस्तिं मानवः ॥९२
कणा सैन्धव संयुक्तं वस्ताण्डैः साधितं पयः ।
तिलाः स्युःशुक्रलास्तेन भाविता सप्तधा हि ते ॥९३
चूर्णमामलकं श्रेष्ठमामलक्यम्बु भावितम् ।
सक्षौद्रं सघृतं वीर्यवृद्धये जरतामपि ॥ ९४
नवा स्त्रियः कामकलाविलोलाः
स्वच्छन्दता सौधगृहे निवासः ।
मृगीदृशां पञ्चमगायनानि
वृष्याणि हृद्यान्यपि यानि कानि ॥ ९५

अथ बृंहणम्

कृशो वाताधिकः प्रायः स व्यवायादि कर्मसु ।
कथं वा क्षमते यावत् बृंहणं न करोति चेत् ॥९६

अमृतार्णवः

भवेद्भाग्युग्मोत्तरो भस्मसूतः सुवर्णस्य भागोऽमृतायाश्च सत्त्वम् ।
समस्तेन तुल्यं भवेदस्य माषः सिता क्षौद्रसर्पिर्युतः पुष्टिकारी ॥९७

---

(१) 'श्वेता' = वृहती कण्टकारी । 'कोल्हः = यवसक्तुकृतं मद्यं 'बीर' (Beer) इति प्रसिद्धम् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

घृतेन पयसा वाऽथ वाजिगन्धापलार्धकम्।
प्रातर्निषेवितं कुर्य्यात्कृशानां पुष्टिमुत्तमाम् ॥ ९८

अथ पूर्णचन्द्रः

सूताभ्रलोहं सशिलाजतु स्या-
द्विडङ्ग ताप्ये मधुना घृतेन।
पिष्टं समस्तं खलु पूर्णचन्द्रो
माषोऽस्य पुष्ट्यै भवति प्रयुक्तः ॥ ९९

पुष्पाणि सच्छालमलिभूरुहस्य
क्षौद्रेण कार्य्यं ह्यनुपानमस्य।
निद्रा दिवो स्वादुरसोऽत्र पथ्यं
कार्य्यं न कोपादिकमुग्रकर्म ॥ १००

अथ सर्वांगप्रीणनो रसः

सूता वरक्तमुनिजकान्तास्तन्येन भावितौ।
मध्वाज्ययवसंयुक्तौ मर्दनात्पुष्टिदौ तनौ ॥ १०१
(१) करवीरजटालेपं यः करोति नरो मणौ।
वीर्यस्तम्भं स लभते कर्णाटीसुरतेष्वपि ॥ १०२
कर्पूरं टंकणं सूतं तुल्यं मुनिरसं मधु।
मर्दयित्वा लिङ्गलेपं कुर्य्याद्यामं विलम्बितः ॥ १०३

---

(१) करवीरजटा = कर्णिकारजटा 'कनेर' इति प्रसिद्धस्य मूलत्वक्।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ततः प्रक्षालयेत्तं तु रमेद्रामां यथोचितम् ।
वीर्य्यस्तम्भकरः पुंसां लेपोनागार्जुनोदितः ॥ १०४
क्वाथं पिबेत्खाखसवल्कलानां
(१) शुण्ठीर्यवानीगुडसंयुतानां ।
(२) क्षुरात्मगुप्तेक्षुरवाजीकर्णैः
साकं मनाक् भ्रष्टसुमाषचूर्णैः ॥
प्राप्नोति दार्ढ्यं सुरतेषु भूयो
भवेद्रिरंसुः कलविंकवत्सः ॥ १०५
लघुशालमलीमूलेन तालमूली सुचूर्णिता ।
सर्पिषा पयसा पीत्वा रतौ चटकवद्भवेत् ॥ १०६
सकर्पूरो रसः क्षौद्रजातीरसविमर्दितः ।
लिङ्गलेपात्करोत्येषा द्रावणं हरिणीदृशाम् ॥ १०७
धूर्तमूलत्वचो लेपो लिङ्गे स्त्रीद्रावणः परः ।
छिक्कणी जीरकं वाजिगन्धा वृद्ध्या क्रमोत्तमा ॥१०८
पीताह्यश्वसिता युक्ता नष्टपुंस्त्वप्रसाधिकाः ।
लिङ्गनाडीषु कर्पूरं पातयित्वा विमर्दयेत् ॥
(३) महिषीनवनीतेन तद्भवेत्खरलिङ्गवत् ॥ १०९

---

(१) 'सर्पिर्यवानी गुडमिश्रितं यः' इति पाठान्तरम् ।

(२) 'क्षुरः'=गोक्षुरः । 'आत्मगुप्ता'=वानरी कौंचबीज इतिभाषा । 'इक्षुरः'= कोकिलाक्षः 'तालमखाणा' इति भाषा । 'वाजीकर्णः'=अश्वगन्धा । अस्मिन् योगे 'सूतस्य' एका रक्तिकाऽपि देया ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(३) सम्मेल्य पिष्ट्वा वेति ज्ञेयम् ।

अथ विषचिकित्सा

स्थावरं जङ्गमं नाम द्विप्रकारं विषं विदुः ।
जटोत्थं कृत्रिमं पूर्वं सर्पदंष्ट्रादिकं परम् ॥ ११०
कर्षं पद्मासनस्थो यः पारदस्य पिबेज्जवात् ।
तस्य नश्यन्ति सर्वाणि विषाणि ध्यानयोगतः ॥ १११

अथ विषवज्ररसः

रसो निशाटङ्कणभूषणानि
तुल्यं समांशं (१) सुरदेवदाल्याः ।
रसेन पिष्टो विषवज्रनामा
रसो भवेत्सर्वविषैकहन्ता ॥ ११२
निष्कोऽस्य संजीवयति प्रयुक्तो
नृमूत्रयोगेन च कालदष्टम् ।
जटाविषेणाकलितं तथान्यैः
(२) दुष्टैर्विषैर्घूर्णितमातुरं च ॥ ११३
श्वेताऽपराजिता देवदालीमूलस्य नस्यतः
वारिणा यान्ति सर्वाणि विषाणि विलयं क्षणात् ११४

---

(१) "सुरः" = देवदारुः ।

(२) 'दूषीविषै' रिति सम्यग्वं प्रपद्ये । उक्तञ्च—

दूषितं देशकालान्नदिवास्वप्नैरभीक्ष्णशः ।
यस्माद्दूषयते धातून् तस्माद्दूषीविषं स्मृतम् ॥ इति

इदं च प्राणहरं भवति ।

CC-0. Panini Kanya Maha Vidyalaya Collection, New Delhi. Digitized by S3 Foundation USA

सटङ्कणा वा मुसली नृमूत्रैः
सिन्धूद्भवं वार्कजटाम्बुपीतम् ।
नीरेण वा टङ्कणको निहन्ति
कालाहिदंष्ट्रा विष मुग्ररूपम् ॥ ११४
जटाविषे कृत्रिमे वा (१) राजिलादि विषेऽथवा ।
सुधानिधिः प्रयोक्तव्यो धीमता विषदोषजित् ॥ ११५
वातपित्तकफा दुष्टाः कुर्वन्त्यातङ्कसंततिम् ।
तेषां पार्थक्यशान्त्यर्थं क्रमः कोऽप्युपदिश्यते ॥ ११६
रास्ना कषायेण मरुद्गदेषु
सर्वेषु योज्यः खलु भस्मसूतः ।
मद्यानि मांसानि च मर्दनानि
तैलावगाहो मधुरा रसाश्च ॥ ११७

अथ क्षीरसागररसः

मृतरसगगनार्कं मुण्डी तीक्ष्णं सताप्यं
सबलि समभिदं स्याद्यष्टिका वारिपिष्टम् ।
तदनु सलिलजातैर्वासकैर्गोस्तनीभिः
मृदितमथविदारी वारिणा घस्रमेकम् ॥ ११८
घृतमधुसहितेयं निष्कमात्रा वटीति
क्षपयति गुरुपित्तं पित्तरोगं क्षयं च ।

---

(१) 'राजिलः' = डुण्डुभसर्पः । आदिना पुण्डरीकराजिचित्रश्वेतहनुप्रभृतीनां ग्रहणम् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

भ्रममदमुख शोषान्दाहतृष्णासमुत्थान्
मलयजमिह पेयं चानुपानं सचन्द्रम् ॥ ११९

अथ कफकेतुः

रसबलिरविताळान्पौष्करं हिङ्गुसिन्धू-
द्भवकटुकि रजस्तत्सर्वमेकत्र पिष्टम् ।
घनरविसुरदाली तिक्तकोशातकीभि
स्तदनुच तद्भाव्यं कृष्णनिर्गुण्डीनीरैः ॥ १२०
कफगदकुलकेतुः स्याद्रसो माषमात्रः
समधुरिति निहन्ति प्रोत्कटं श्लेष्मरोगम् ।
अनुपिबति कषायं निम्बजं यः पुमान्स्यात्
सुचिरगदविमुक्तः सोऽचिरं पथ्यसेवी
सेव्यं चास्मिन्यवजमशनं पथ्यमुष्णाम्बु सेव्यम् ॥ १२१

अथ नाडीपरीक्षा

वातेन नाडीस्फुरणं भुजङ्गलीलेव दोलेव जलौकिकेव ।
भवेत्पथि व्याकुलतेन्द्रियस्य संभोगखिन्नस्य तथा रिरंसोः १२२
पित्तेन मण्डूकमयूरलावगतिप्रतीतिं कुरुते ऽथ नाडी
वातस्य शैलाभिहतस्य जन्तोर्वेगावरोधाकुलितस्य भूयः । १२३
गतिं विधत्ते धमनीगजेन्द्रमरालबालेव कफोल्वणेन ।
तृप्तस्य दृप्तस्य च मेदुरस्य निद्राकुलस्याविसुखे रतस्य ॥ १२४

CC-0. Prof. Satya Vrat Shastri Collection. Digitized by S3 Foundation USA

एतैर्द्विदोषाऽथ समस्तदोषा चिन्हैर्विमिश्रैर्भिषजाऽवधार्या ।
नाडी यथाकालमपि त्रयाणां प्रकोपशान्त्यादिभिरेव भूयः ॥१२५

इति श्री रत्नदेवसुत श्रीरामराजविरचितरसरत्नप्रदीपे गलगण्डादिनाडीपरीक्षान्तः चिकित्सानिरूपणो नाम पञ्चमोऽधिकारः समाप्तः ।

आसीन्मनसारामो काश्यप इव काश्यपो महावैद्यः ।
नव्वाबराज्य काले मूलत्राणे रसक्रियानिपुणः ॥ १ ॥
तस्मात्तेजोभानुर्बभूव भुवि भानुरेव तेजस्वी ।
आर्त्ता यं सम्प्राप्य सद्यो मुक्ता बभूवुरार्त्तिभ्यः ॥ २ ॥
नौवतरामस्तस्मान्नौवत्सन्तारणे महाशक्तिः ।
आपत्सागरतो यो लोकानां सकलशोकनाशकरः ।
दीवानेति ख्यातः 'सावनमल्लो' ऽपि यस्य मानपरः ॥ ३ ॥
तस्मान्मोतीरामो धन्वन्तरिरिव महायोगी
यस्याश्रयङ्गतानां भीतिर्नाभून्महारुजां लोके ॥ ४ ॥
तस्माज्जातो नाम्ना ठाकुरदत्तेति सुप्रसिद्धरसः ।
'रसरत्नदीपलोक' स्तेनायं संस्कृतस्तमोहन्ता ॥ ५ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥ समाप्तश्चायंग्रन्थः ॥

निवेदनम्

आयुर्वेदशास्त्रोक्ता सिद्धाः रसोपरसाः पोट्टली पर्पटी गुग्गुलुः चूर्णवटिका घृत तैल सत्व-क्षार लेहासवारिष्टाद्याः प्रात्यहिक सर्ववैद्य योगवहाः सर्वरोगसंहरणक्षमा विधि-साधिताः सुकरतायै विक्रयार्थं प्रस्तुताः सन्ति । ते च ग्राहकेभ्यो वी. पी. द्वारा यथायोगं प्रेष्यन्ते ।

प्राप्तिस्थानम्—

अमृत औषधालय

गुमटी बाजार

लाहौर ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

स्वास्थ्यम्

नाविदितमेतद्विद्वद्वराणाम्, किं खलु स्वास्थ्य मिति। स्वास्थ्याभावादेव वयं न किमपि कर्तुं पारयामः। सर्वत्र सर्वदा सर्वथा वयं बलरहिताः, रोगग्रस्ताः, समुन्नतिपथं नैव वर्तामहे। श्रीठाकुरदत्तपादैर्लोकहितायैव पुस्तकस्यैतस्य निर्माणं विहितम्। पुस्तकमेतदवश्यं स्वनामानुकूलमेव जनान् प्रीणयिष्यति। त्वरया चेदं पुस्तकं सज्जनानां हर्षमाधास्यति।

श्रीरसदीपिका

पुस्तकमेतन्नामधेयं मुद्रणालये मुद्रायितुं वर्तते द्रुतञ्चेदं सहृदयलोचनपथमवतरिष्यति। अस्य प्रणेता श्रीमदानन्दानुभवपादाः, अनुभव सिद्धाः योगविशारदा वर्तन्ते। अत्र रसनिर्माणं सम्यक्तया ग्रन्थकर्त्रा प्रदर्शितम्। अत्रापि ठाकुरदत्त शास्त्रिभिः कठिनस्थलेषु समुचितं विवरणं कृतम्।

मावत्को

श्रीभानुदत्त साहित्यालंकारः

अमृत औषधालय

गुमटी बाज़ार लाहौर।

"THE EDUCATIONAL PRINTING WORKS, LAHORE."

PRINTED BY GHULAM QADIR KHAN.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA